CHALUKYACHARITAM

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE.
MADRAS.
1975

BY

Aitihasikakulapati Puranatattvavisarada
S. P. L. NARASIMHASWAMI

WITH AN INTRODUCTION BY

DR. K. R. S[UBR]AHMANYA IYER, MA.,PH.D.
Professor History and Economics,
Mah[arajah] College, Vizianagaram.

MADRAS
PRINTED AT THE VAVILLA PRESS
1938

॥ चालुक्यचरितम् ॥

ऐतिहासिककुलपतिना पुराणतत्त्वविशारदेन
श्रीपरवस्तु–लक्ष्मीनरसिंहस्वामिना
सङ्कलितम्

1975

आंग्लोपोद्घातटिप्पणीभ्यां संवलितम्

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE,
MADRAS.

चेन्नपुर्यां
वाविळ्ळमुद्रणालये मुद्रितम्
1938

PREFACE

The importance of historical works, every statement in which is culled from contemporary records cannot be too much emphasised. All the information of importance contained in the inscriptions belonging to the Eastern Chalukyas is incorporated in this work. On the other hand every sentence in the work is found in one or other of the inscriptions. The work of the author has been confined to their arrangement in a connected form.

The Age of the Chalukyas is important in Indian History in as much as it was the period of Brahmanic revival and literary progress in Southern India. The present work also reveals the popularity which the Sanskrit language enjoyed in Southern India long after it ceased to be a spoken language.

I am indebted to Professor K. R. Subrahmanya Iyer, M.A., PH. D., Head of the department of History and Ecommics in the Maharajah's English College, Vizianagaram for the readiness with which he complied with my request to write an Introduction to this work. He discussed in it the historical, social and literary conditions of Southern India in the four and half centuries of Chalukyan power. I am also indebted to the Proprietor of the Vavilla Press for the speedy manner in which he

carried on the printing of the work and for the excellent get-up of the same. My brother, P. V. Ramanujaswami, M.A., Principal, Maharajah's Sanskrit College Vizianagaram was of great help to me in the preparation of the work.

The notes at the end are from the volumes of the Indian Antiquary in which the Eastern Chalukya inscriptions were published.

THE AUTHOR.

INTRODUCTION

By Dr. K. R. Subrahmaniam, M A., Ph. D.

Professor of History and Economics, Maharajah's College, Vizianagaram.

It gives me very great pleasure to write an introduction to this book. Sriman Paravastu Lakshmi Narasimhaswami garu, a well-known scholar belonging to a family of scholars, has done a distinct service in collecting together and publishing in a connected form such parts of the Eastern Chalukyan inscriptions as would make a continuous story from the origin of the Chalukyas down to Kulottunga Chola II (ac. 1133 A.D.) This garland of verses reveals how much of beautiful literature is concealed in these inscriptions. There is evidence enough in this collection to show the state of Sanskrit literature, the varied literary forms and the evolution of the culture which nurtured the tender Telugu sapling. For, it was during this era of about four and a half centuries that Brahminism revived in Andhradesa and Telugu literature began under its auspices. Another very interesting feature in these inscriptions is the evolution of the script which was, remarkably enough, followed in Farther India.

The Chalukyas were of the lunar race. They claim to have come from the north. As the story goes, Vijaya-

ditya came south and encountered by Trilochana Pallava, was killed in battle. His infant son, Vishnuvardhana was brought up by a Brahmin of Mudivemu, Vishnubhatta Somayaji. He became a great conqueror. His son was Ranaraga. His son was Pulikesi, founder of Vatapi. His sons were Kirtivarman and Mangalesa, both of them valiant kings. Pulikesi son of Kirtivarman was the most famous. The exploits of these kings have been enshrined in fine verses by Ravikirti, author of the Aihole epigraph.

Pulikesi II conquered Andhra and made his younger brother Vishnuvardhana Viceroy in 615 A.D. He won his spurs in Pulikesi's *digvijaya*. He ruled for 18 years and left the kingdom independent of the main line at Vatapi. He patronised learning and his queen built a temple to Jina. He was very kind to the Brahmins and to the poor. The firm establishment of a Kanarese dynasty in Andhra had great cultural consequences.

Vishnuvardhrna had two sons Jayasimha (632–663) and Indrabhattaraka who reigned only for a few days. Indra's son Vishnuvardhana II ruled for 9 years (663–672). Jayasimha was a great scholar, warrior and ruler. He had great devotion to scholars and institutions for learning. Dandin gives a varied menu of knowledge which was imbibed by the Princes of his time. A careful study of the Eastern Chalukyan inscriptions reveals how great care was bestowed on the education of the princes in arms, useful arts, fine arts and statecraft. There were several great Vedic scholars in the reign of Jayasimha who gave lands to them

His son Vijayaditya ruled from 747 to 766. Then came his son Vishnuvardhana IV, 766–802. Vijayaditya II, his son ruled from 802 to 842. Kali Vishnuvardhana son of the second Vijayaditya ruled for 18 or 20 months followed by his son Vijayaditya III, 844–888.

The Rashtrakutas over threw the Chalukyas of Vatapi in about Saka 675 and ruled over the Deccan for about two centuries. During this period there was incessant warfare between the Rashtrakutas and the Eastern Chalukyas. The copper plates of both the dynasties indicate a number of sanguinary conflicts. The war took a turn for the worse when Bhima Salukki, the younger brother of Vijayaditya II joined the Ratta foe. But Vijayaditya II rose to the occasion and destroyed the Gangas and the Ratta generals after warring with them for 12 years and drove out Bhima Salukki, the traitor. He is said to have fought night and day with his enemies in 108 battles and built 108 temples to Siva in memory of his victories. The devastating war ended by the marriage of a Ratta princess to his son. But the respite was short-lived as Kali Vishnuvardhana seems to have lost his life in repelling the invasion of Amoghavarsha I. His short reign showed his grasp of Political Science and great military skill. He enforced *Varnashrama Dharma*.

Three sons were left by Kali Vishnu. The last joined the Ratta enemy against his eldest brother Vijayaditya III. A big confederacy had been formed against the king of Andhra. But Vijayaditya had a great general

Panduranga who was the hero in many a battle. He first reduced the twelve forts of the Boyas of Nellore, captured the fort of Kathevaram and recovered Vengi which had evidently passed under the enemy. Krishna and Sankila—the Ratta and the Vaidumba—were frightened away after Panduranga took and burnt Kiranapura. Mangi Nolamba, another confederate, was beheaded in the war. The Pallava and the Pandya too joined against Vijayaditya. So the Andhra hero routed them, conquered Kalinga and Kosala and burnt Chakrakuta. These engagements must have obtained for him epic fame. He took even more high-sounding titles than his grand-father. All the wealth that he took in his expeditions he gave away in charities.

Krishna II, Rashtrakuta, waited only for the death of Vijayaditya to overrun Vengi. Chalukya Bhima I could crown himself only four years after his uncle's death in 892 A.D. as his capital was in the enemy's hands. Ultimately Bhima expelled Krishna and routed in battle his allies, the King of Lata and the Chalukya Baddega. His son Irimarti-ganda, barely 16, died in the war. Mahakala was Bhima's great general. The King was also served by the loyal Pattavardhini family which had produced such distinguished warriors like Kalakampa (7th century) and Panduranga. Bhima patronised poets, musicians and dancers, some of whom were non-Andhras. His grant to a songstress Challava seems to be a love poem on copper.

Bhima's son Vijayaditya IV ruled only for six months. He was called ruler of Vengi and Trikalinga. He seems

to have planted a pillar of victory at Virajapuri, perhaps after a Ratta war. His general was Pattavardhini Bhandanaditya.

His son Amma I ruled in 918—925. Govinda IV Rashtrakuta was the contemporary of as many as eight kings of Vengi beginning with Vijayaditya IV Kollabhiganda. He took keen interest in the Eastern Chalukyan family dissensions and fomented them to promote his own interests. Amma I destroyed his traitorous relations, turned back the Ratta foe and shifted his capital to Rajahmundry as Vengi was very vulnerable to attacks by the enemy from the Deccan.

Ammaraja's two sons, Beta or Kanthika Vijayaditya and Bhima, were too young. Set aside and imprisoned after a fortnight's rule by Tadapa, Beta lived to found a subordinate branch. Tadapa or Talapa was the son of Yuddhamalla the traitor-brother of Vijayaditya III. He ruled only one month. Vikramaditya uncle of Amma I ruled a year then. Bhima second son of Amma I ruled for eight months. Then civil war broke out and the crown passed on to Yuddhamalla son of Talapa. He ruled for seven years (927–934) Vengi became the battle-ground of adventurers and Bhima II, half brother of Amma I drove out the exploiting foreigners and Yuddhamalla ascended the throne. "Having, unaided, slain the glorious Rajamayya (Ganga Rachamalla) and the mighty Dhalaga (Sabara chief ?) and the fierce Tatabikki (Telugu Chola ?) and

Bijja (Banavasi chief?) and Ayyapa (Nolamba) who was always ready and was exceedingly powerful in war and the terrible and fierce army that was despatched by Govindaraja (Ratta) and the great Lovabikki the ruler of the Cholas and the valorous Yuddhamalla and his drawn up array of elephants...this King Bhima protected the whole earth for 12 years" (934—945.)

Yuddhamalla's inscription in the Mallesvaraswami temple at Bezwada is in Telugu poetry and thus it is an important contribution to our meagre knowledge of early Telugu. "It takes the history of Telugu literature at least two centuries back." The most striking feature of the epoch of our study is the slow evolution of Telugu language, script and literature which can be traced through the inscriptions. Merely a spoken language to start with, it becomes respectable enough to be used by kings in their epigraphs. A few stray words occur in the earliest inscriptions, then a few sentences and ultimately whole inscriptions are composed in the popular language. It thus became the vehicle of higher thoughts, the instrument to popularise ancient culture when once it was adopted by the kings, nobles and Brahmins for making grants, keeping records and writing books. The Vipparla and Lakshmipuram epigraphs and the unreadable Ahadanakaram grant are gramophone records for all time for people to hear the birthpangs of Telugu. Readable Telugu verse can be had in some of the Nellore inscriptions of the ninth century and it gains elegance as we pass on through the verses of

Yuddhamalla at Bezwada. Sanskrit seems to have suffered temporarily on account of the new language as we can see from the corrupt language of the inscriptions but, ultimately both gained as is evidenced by the Miltonic style of the immortal work of Nannayya and by the beautiful Sanskrit verses in the epigraphs of Rajaraja and Virachoda.

The Kolavennu grant of Chalukya Bhima II pays a very high compliment to the family of Kommana and refers to the grant of agraharas to Brahmins who were learned. In those days learning was preserved by rote and the Brahmins were charged with the duty of conserving and adding to knowledge. That was why Brahmins were given rent-free lands and freed from the worry of seeking their livelihood. But for these grants our history would be almost a blank ! Simple, temperate, conservative and loyal, the Brahmins preserved social order and interpreted the good old laws of the land. Some of them were composers of the verses in the grants, some of them scholars in Vedas, Puranas or Smritis, some of them priests, some of them ministers or other officers while others were teachers to princes and people, astrologers, village headmen etc. We get a large number of names of scholars and poets who flourished in the Eastern Chalukyan period. Some of them were even generals like Medamarya son of Potana in the reign of Virachoda. Some of them came from far off Tamil, Maratha and Kannada countries.

Amma II (945—970)* was the son of Chalukya Bhima II. He superseded his elder brother by a different mother, Danarnava. Made Yuvaraja at eight, crowned Maharaja at twelve, Ammaraja was a precocious youth, a loving brother, a scholar and patron of letters and fine arts, a king loved equally by Jains and Brahmins. He showed his valor in battles against the great Ratta King Krishna III who instigated Kalinga and set up the sons of Yuddhamalla, Badapa and Tala against the Andhra king. Amma was defeated and exiled in 970. Danarnava held out and ruled for three years (970—973) when Badapa and Tala overwhelmed him also. Ammaraja has made some grants to Jains. He was also devoted to Hara and his family deity was Hari. Kumarila, an Andhra and Sankaracharya must have accelerated the decline of Jainism. The Jains contribution to the Dravidian vernaculars was not small and the early Jain Kanarese poets Pampa, Ponna and Nagavarman belonged to Vengidesa.

We do not know how long Badapa and Tala ruled. As they were usurpers the legitimate line that ascends the throne again in 1000 A.D. treats the whole period 973—1000 as a period of anarchy. Perhaps after the death of the two brothers there was disorder. A Telugu Chola, Jata Choda Bhimanripati took hold of a large part of Andhra and he was dispossessed by Rajaraja, the great Chola emperor of the south. It might be that Danarnava

---

* Cf. stanza 75 on page 20 of the text.

who still lived invited Rajaraja. The old line was restored. Saktivarman son of Danarnava became king (999--1011). His younger brother Vimaladitya ruled for seven years. He was the son-in-law of Rajaraja Chola. His son the famous Rajarajanarendra ruled in 1018—1061.* He was the son-in-law of Rajendra Chola. In his reign lived the famous scholars Nannayya Bhatta and Narayana Bhatta. He had a good deal of trouble with his brother Vijayaditya who usurped the throne at least twice and crowned his son Saktivarman king on 18--10—1061 after Narendra's death. Sakti died next year and Vijayaditya became Viceroy under Kullottunga 1 his nephew (Narendra's son) who became Chola emperor. Vijayaditya reconciled himself to the new position only out of sheer necessity. He had sought the help of the Western Chalukya of Kalyani but in vain. The Cholas, the enemies of the Chalukyas of the Deccan were interested in keeping Andhradesa out of their sphere of influence.

Kulottunga I (1070—1118) was one of the greatest of the Chola emperors. Like his mother Ammangi, his wife too was a Chola Princess. His predecessor on the Chola throne had become unpopular, thanks to his Western Chalukyan relation and perhaps also the organised opposition of the Vaishnavas whom he persecuted. He was assassinated and Kulottunga ascended the throne.

Southern influences filtered into Andhra from the first marriage alliance between the Chola and Eastern

* Cf. stanza 110 on page 25 of the text.

Chalukyan royal families. They increased after Kulottunga's accession to the Chola throne. A new literary zeal, a wave of Vaishnavism rolling over the land, then a wave of Saivism emanating from Draksharama, renewed temple building activity—these are attributable to some extent to the Chola-Chalukya contact.

Andhra was governed by Rajaraja, the second son of Kulottunga, after Vijayaditya. He became home-sick and returned after a year's rule (1076—1077). Then came his younger brother Vira Choda. He ruled in the first instance for five years (1078—1083)* then was recalled and posted again in (1088—1093). The intervening period was occupied by his brother Rajaraja Choda Ganga's viceroyalty (1084—1088).

The Capital of Vira Choda was Jananathapuri near Cocanada. He settled near Pithapuram a large number of Brahmin families from the banks of the Kaveri and organised an interesting communal life for them. At Chelluru a Vishnu temple was built by Medamarya, a Vaishnava Brahmin general of Vira Choda. The Viceroy gave lands to the temple and in so doing has praised the remarkable qualities of his general who had dug a tank at Chelluru and opened two free boarding houses for Brahmins at Pithapuram and Draksharama. From the Chellur grant of Vira Choda we also hear of the cabinet of five ministers that he had. We learn from earlier grants also that there was such a council besides a well-organised

* Cf. stanza 137 on page 30 of the text.

administration in which responsibility was localised in the hands of nobles who were in charge of districts. A magnificent Puranic and legendary genealogy is woven for the Chalukya family and grand *birudas* and *lanchanas* are assumed from about this time. Perhaps it was in Vira-Choda's time that a grand expedition was led from Dravida by Karunakara Tondaman for the conquest of Kalinga.

Vikrama Chola was Viceroy of Andhra for some years before 1118 when he left to succeed his father on the Chola throne. Then the real power was in the hands of the Velnati chiefs.

In the reign of Kulottunga II son of Vikrama Chola who ruled as Emperor in 1133—1146, a governor and general of Vengi having his capital on the Kolleru named Katamanayaka gave an *agrahara* to a number of Brahmins.

The son and successor of Kulottunga II, Rajaraja II (1146-73) made the Velnati chief Rajendra Chola the ruler of Andhradesa. Even the shadow of Chola suzerainty disappeared in a few years and the whole kingdom was dismembered.

This short sketch of Eastern Chalukyan history, it is hoped, may help the reader of the following epic of the Eastern Chalukyan kings in contemporary verses laboriously culled by the learned author from epigraphs scattered in many publications.

॥ नमः परमर्षिभ्यः ॥

॥ नमः श्रीवेङ्कटरङ्गनाथाय ॥

॥ चालुक्यचरितम् ॥

जयति जलधिकन्यावक्त्रपद्मांशुमाली
सकलभुवनसृष्टित्राणसंहारहेतुः ।
उपनिषदवगम्यो योगिविज्ञानवेद्यः
त्रिदशवरवचोभिः स्तूयमानो मुकुन्दः ॥ १

सर्वाकारमशेषस्य जगतः सर्वदा शिवम् ।
गोब्राह्मणनृपाणां च शिवं भवतु सर्वदा ॥ २

जयति जयति नित्यं सोमवंशो महीभृ-
च्छिरसि निहितपादः संश्रयः कीर्तिवल्ल्याः ।
जलधिवलयितोर्वीचक्रवालालवाला-
द्रिपुनृपरुधिरोदैरुक्षितादुद्गतायाः ॥ ३

तदनु चिरमपरिचेयश्चुलुक्यकुलविपुलजलनिधिर्जयति ।
पृथिवीमौलिललामो यः प्रभवः पुरुषरत्नानाम् ॥ ४

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभोः
नाभीपङ्करुहाद्बभूव जगतः स्रष्टा स्वयम्भूस्ततः ।
जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रितः
सोमो वंशकरः सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥ ५

तस्मादभूत्सुधासूतेर्बुधो बुधनुतस्ततः ।
जातः पुरूरवा नाम चक्रवर्ती सविक्रमः ॥ ६

तस्मादायुस्ततो नहुषस्ततो ययातिश्चक्रवर्ती वंशकर्ता ततः [1]पुरुस्ततो जनमेजयस्ततः प्राचीशस्ततः सैन्ययातिस्ततो हयपतिस्ततः सार्वभौमस्ततो जयसेनस्ततो महाभौमस्तस्मादैशानकस्ततः क्रोधानन-स्ततो देवकिस्तस्मादृभुकस्तस्मादृक्षकस्ततो मतिवरः सत्त्रयागयाजी सरस्वतीनदीनाथस्ततः कात्यायनस्ततो नीलस्ततो दुष्यन्तस्तत्सुतो गङ्गायमुनातीरयोरविच्छिन्नान्निखाय यूपान्क्रमशः कृत्वा तथाश्वमेधं नाम महाकर्म भरत इति योऽलभत । ततो [2]भरताद्भूमन्युस्ततो हस्ती ततो विरोचनस्तस्मादजमीलस्ततः [3]संवरणस्ततः सुधन्वा ततः परिक्षि-त्ततो भीमसेनस्ततः प्रदीपनस्ततः शन्तनुस्ततो विचित्रवीर्यस्ततः पाण्डुराजः ।

पुत्रास्तस्य च धर्मजभीमार्जुननकुलसहदेवाः ।
पञ्चेन्द्रियवत्पञ्च स्युर्विषयग्राहिणस्तत्र ॥ ७

येनादाहि विजित्य खाण्डवमथो गाण्डीविना वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालाभि दैत्यान्वहून् ।
इन्द्रार्धासनमध्यरोहि जयिना यत्कालिकेयादिकान्
हत्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः ॥ ८

---

1 "पुरुरिति चक्रवर्ती ततो जनमेजयोऽश्वमेधत्रितयस्य कर्ता" [इति पाठान्तरम्]

2 'भरताद्भूमन्युस्तस्मात् सुहोत्रस्ततो हस्ती' [इति पाठान्तरम्]

3 'संवरणस्तस्य च तपनसुतायास्तपत्याश्च सुधन्वा' [इति पाठान्तरम्]

ततोऽर्जुनादभिमन्युस्ततः परिक्षित्ततो जनमेजयस्ततः क्षेमुकस्ततो नरवाहनस्ततः शतानीकस्तस्मादुदयनः । ततः परं तत्प्रभृतिष्वविच्छिन्नसन्तानेष्वयोध्यासिंहासनासीनेष्वेकान्न षष्टिचक्रवर्तिषु गतेषु तद्वंश्यो विजयादित्यो नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत् । तस्मिन्नङ्कुले पुरोहितेन वृद्धामात्यैश्च सार्धमन्तर्वत्नी तस्य महादेवी मुडिवेमुनामाग्रहारं कतिपयाभिरन्तःपुरकान्ताभिः कञ्चुकिभिश्च सहोपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना महामुनिप्रभावेण दुहितृनिर्विशेषमभिरक्षिता सती विष्णुवर्धनं नन्दनमसूत । सा तस्य कुमारस्य मानव्यगोत्रहारीतिपुत्रद्विपक्षगोत्रक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत् । स च मात्रा विदितवृत्तान्तः सन्निर्गत्य चलुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च सन्तर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दपालिकेतनप्रतिढक्कावराहलाञ्छनपिच्छलकुन्तसिंहासनमकरतोरणकनकदण्डगङ्गायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडम्बगङ्गादिभूमिपान्निर्जित्य सेतुनर्मदामध्यं सार्धसप्तलक्षं दक्षिणापथं पालयामास ॥

नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे
नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे ।
लक्ष्मीर्भावितचापलादिव कृता शौर्येण येनात्मसात्
राजासीज्जयसिंहवल्लभ इति ख्यातश्चलक्यान्वयः ॥ ९

तदात्मजोऽभूद्रणरागनामा दिव्यानुभावो जगदेकनाथः ।
अमानुषत्वं किल यस्य लोकः सुप्तस्य जानाति वपुःप्रकर्षात् ॥

तस्याभवत्तनूजः पुलिकेशी यः श्रितेन्दुकान्तिरपि ।
श्रीवल्लभोऽप्ययासीद्वातापिपुरीवधूवरताम् ॥ ११

यत्त्रिवर्गपदवीमलं क्षितौ नानुगन्तुमधुनापि राजकम् ।
भूश्च येन हयमेधयाजिना प्रापितावभृथमज्जना बभौ ॥ १२

नलमौर्यकदम्बकालरात्रिस्तनयस्तस्य बभूव कीर्तिवर्मा ।
परदारविवृत्तचित्तवृत्तेरपि धीर्यस्य रिपुश्रियानुकृष्टा ॥ १३

रणपराक्रमलब्धजयश्रिया सपदि येन विरुग्णमशेषतः ।
नृपतिगन्धगजेन महौजसा पृथुकदम्बकदम्बकदम्बकम् ॥ १४

तस्मिन्सुरेश्वरविभूतिगताभिलाषे
राजाभवत्तदनुजः किल मङ्गलीशः ।
यः पूर्वपश्चिमसमुद्रतटोपिताश्वः
सेनारजःपटविनिर्मितदिग्वितानः ॥ १५

स्फुरन्मयूखैरसिदीपिकाशतैर्व्युदस्य मातङ्गतमिस्रसञ्चयम् ।
अवाप्तवान्यो रणरङ्गमन्दिरे कलच्चुरिश्रीललनापरिग्रहम् ॥ १६

पुनरपि च जिघृक्षोः सैन्यमाक्रान्तसालं
रुचिरबहुपताकं रेवतीद्वीपमाशु ।
सपदि महदुदन्वत्तोयसङ्क्रान्तविम्बं
वरुणबलमिवाभूदागतं यस्य वाचा ॥ १७

तस्याग्रजस्य तनये नहुषानुभावे
लक्ष्म्या किलाभिलषिते पुलिकेशिनाम्नि ।
सासूयमात्मनि भवन्तमतः पितृव्यं
ज्ञात्वापरुद्धचरितव्यवसायबुद्धौ ॥ १८

स यदुपचितमन्त्रोत्साहशक्तिप्रयोग-
क्षपितबलविशेषो मङ्गलीशः समन्तात् ।
स्वतनयगतराज्यारम्भयत्नेन सार्धं
निजमतनु च राज्यं जीवितं चोज्झति स्म ॥ १९

तावत्तच्छत्रभङ्गे जगदखिलमरात्यन्धकारोपरुद्धं
यस्यासह्यप्रतापद्युततितिभिरिवाक्रान्तमासीत्प्रभातम् ।
नृत्यद्विद्युत्पताकैः प्रजविनि मरुति क्षुण्णपर्यन्तभागैः
गर्जद्भिर्वारिवाहैरलिकुलमलिनं व्योम या(जा)तं कदा वा ॥

लब्ध्वा कालं भुवमुपगते जेतुमाप्यायिकाख्ये
गोविन्दे च द्विरदनिकरैरुत्तराम्भोधिरण्याः ।
यस्यानीकैर्युधि भयरसज्ञत्वमेकः प्रयातः
तत्रावाप्तं फलमुपकृतस्यापरेणापि सद्यः ॥ २१

वरदातुङ्गतरङ्गरङ्गविलसद्धंसानदीमेखलां
वनवासीमवमृद्नतः सुरपुरप्रस्पर्धिनीं सम्पदा ।
महता यस्य बलार्णवेन परितः संछादितोर्वीतलं
स्थलदुर्गं जलदुर्गतामिव गतं तत्तत्क्षणे पश्यताम् ॥ २२

गङ्गाम्बु पीत्वा व्यसनानि सप्त हित्वा पुरोपार्जितसम्पदोऽपि ।
यस्यानुभावोपनताः सदासन्नासन्नसेवामृतपानशौण्डाः ॥ २३

कोङ्कणेषु यदादिष्टचण्डदण्डाम्बुवीचिभिः ।
उदस्तास्तरसा मौर्यपल्वलाम्बुसमृद्धयः ॥ २४

अपरजलधेर्लक्ष्मीं यस्मिन्पुरीं पुरभित्प्रभे
मदगजघटाकारैर्नावां शतैरवमृद्नति ।
जलदपटलानीकाकीर्णं नवोत्पलमेचकं
जलनिधिरिव व्योम व्योम्नः समोऽभवदम्बुधिः ॥ २५

प्रतापोपनता यस्य लाटमालवगूर्जराः ।
दण्डोपनतसामन्तचर्या वर्या इवाभवन् ॥ २६

अपरिमितविभूतिस्फीतसामन्तसेना-
मुकुटमणिमयूखाक्रान्तपादारविन्दः ।
युधि पतितगजेन्द्रानीकवीभत्सभूतो
भयविगलितहर्षो येन चाकारि हर्षः ॥ २७

भुवमुरुभिरनीकैः शासतो यस्य रेवा
विविधपुलिनशोभावन्ध्यविन्ध्योपकण्ठा ।
अधिकतरमराजत्स्वेन तेजोमहिम्ना
शिखरिभिरिभवर्ज्या वर्ष्मणां स्पर्धयेव ॥ २८

विधिवदुपचिताभिः शक्तिभिः शक्रकल्पः
तिसृभिरपि गुणौघैः स्वैश्च माहाकुलाद्यैः ।

अनमदधिपतित्वं यो महाराष्ट्रकाणां
नवनवतिसहस्रग्रामभाजां त्रयाणाम् ॥ २९

गृहिणां स्वगुणैस्त्रिवर्गतुङ्गा विहितान्यक्षितिपालमानभङ्गाः ।
अभवन्नुपजातभीतिलिङ्गा यदनीकेन सकोसलाः कलिङ्गाः ॥ ३०

पिष्टं पिष्टपुरं येन जातं दुर्गमदुर्गमम् ।
चित्रं यस्य कलेर्वृत्तं जातं दुर्गमदुर्गमम् ॥ ३१

सन्नद्धवारणघटास्थगितान्तरालं
नानायुधक्षतनरक्षतजाङ्गरागम् ।
आसीज्जलं यदवमर्दितमभ्रगर्भा-
कैणालमम्बरमिवोर्जितसान्ध्यरागम् ॥ ३२

उद्धूतामलचामरध्वजशतच्छत्रान्धकारैर्बलैः
शौर्योत्साहरसोद्धतारिमथनैर्मौलादिभिः षड्विधैः ।
आक्रान्तात्मबलोन्नतिं बलरजःसंछन्नकाञ्चीपुरः
प्राकारान्तरितप्रतापमकरोद्यः पल्लवानां पतिम् ॥ ३३

कावेरी द्रुतशफरीविलोलनेत्रा
चोलानां सपदि जयोद्यतस्य यस्य ।
प्रश्च्योतन्मदगजसेतुरुद्धनीरा
संस्पर्शं परिहरति स्म रत्नराशेः ॥ ३४

चोलकेरलपाण्ड्यानां योऽभूत्तत्र महर्द्धये ।
पल्लवानीकनीहारतुहिनेतरदीधितिः ॥ ३५

उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समन्ताद्दिशो
जित्वा भूमिपतीन्विसृज्य महितानाराध्य देवद्विजान् ।
वातापीं नगरीं प्रविश्य नगरीमेकामिवोर्वीमिमां
चञ्चन्नीरधिनीलनीरपरिखां सत्याश्रये शासति ॥ ३६

त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः ।
सप्ताब्दशतयुक्तेषु गतेष्वब्देषु पञ्चसु ॥ ३७

पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु च ।
समासु समतीतासु शकानामपि भूभुजाम् ॥ ३८

तस्याम्बुधित्रयनिवारितशासनस्य
सत्याश्रयस्य परमाप्तवता प्रसादम् ।
शैलं जिनेन्द्रभवनं भवनं महिम्नां
निर्मापितं मतिमता रविकीर्तिनैकम् ॥ ३९

स समनुष्ठितपतिदेवताव्रतकमलालयाविपुलपयोधरविलुप्तचन्द-नालेपः सुरेन्द्रमन्दिरजातकिन्नराङ्गनापतीयमानविमलकीर्तिः स्वरदन-कुलिशविभिन्नरिपुहृदयोद्गतरुधिरधारास्नपितमस्तकमत्तमातङ्गोदयपर्वत-तरुणरविः निगृहीतदुष्टजनः परिगृहीतविद्वत्सखोऽनुगृहीतभृत्यवर्गः करगतखड्गोत्कृत्तपरनृपदन्तिदन्तोत्थितवह्निशिखोद्दीपितरणभूमिः वर-युवतिनयनसायकैकलक्ष्यो विविधशास्त्रार्थतत्त्वविचारक्षमसूक्ष्मबुद्धिश्च-लुक्यकुलतिलकः सर्वसद्गुणाश्रयो रिपुदरिद्रः श्रीसत्याश्रयो

धर्माय धर्मः श्रेयोवाप्तये तस्य तनयः शशधर इव सर्वलोकहृदयानन्दकरः सुरगज इवाविच्छिन्नदानसलिलकीर्णनिकेतः चक्रधर इवाप्रतिहतचक्रो द्रोण इव कृपानुगतः स्वबाहुबलोपार्जितसर्वसिद्धिः समरशतसङ्कटोत्कण्ठविजयवीरध्वजः सकलावनिपतिमकुटतटघटितमणिमयूखपुञ्जमञ्जरितचरणसरोरुहः स्वगुणानुरक्तप्रकृतिसम्पादितसर्वसम्पत् श्रीजयसिंहवल्लभमहाराजः परमब्रह्मण्यो मातापितृपादानुध्यातस्त्रिंशद्वर्षाणि वेङ्गीदेशमपालयत् । तेन गुद्दहारविषये सद्दवल्लिपूर्वपार्श्वे पेणुकपरुनाम ग्रामो विपुवनिमित्ते विजयराज्यसंवत्सरेऽष्टादशे पोगुल्लूरवास्तव्यस्य भारद्वाजसगोत्रस्य भारद्वाजसूत्रस्याधीतवेदद्वयस्य शिवशर्मणः पौत्राय गृहीतसाहस्रस्याधिगतवेदद्वयस्य देवशर्मणः पुत्राय षट्कर्मनिरतायाशीतितर्काय गुप्तशर्मणे सर्वकरपरिहारेणाग्रहारीकृत्य प्रतिग्रहो दत्तः ॥

तस्य प्रियानुजोऽनेकयुद्धलब्धविजयालङ्कृतशरीर इन्द्रसमविक्रम इन्द्रभट्टारकः सप्तदिनानि राजाभूत् । तस्य प्रियतनयः शक्तित्रयानमितानेकराजन्यमुखकमलशोभाभ्यर्चितचरणयुगलः अनेकसमरसङ्कटोपलब्धयुद्धविजययशःप्रसूत्यामोदगन्धाधिवासितसकलदिङ्मण्डलः चतुरुदधिवेलावलयपर्यन्तप्राप्तकीर्तिर्मन्वादिप्रणीतधर्मशास्त्रप्रचरितसर्वलोकाश्रयः चक्रधर इव चक्रवर्तितालक्षणालङ्कृतशरीरः समधिगतपञ्चमहाशब्दः सकलेन्दुरिव सकलकलाधिष्ठानो विष्णुरिव श्रीनिवासः परममाहेश्वरो मातापितृपादानुध्यातः त्यागौदार्यधैर्यकान्त्यादिगुणालङ्कृतः श्रीमान् विष्णुवर्धनमहाराजो नव वर्षाणि भुवमरक्षत् । तेन

वर्धमानराज्यद्वितीयसंवत्सरे चैत्रमासे शुक्लपक्षे दशम्यां मखानक्षत्रे बुधवारे बलविजयारोग्यनिमित्तं कर्मराष्ट्रविषये रेयूरुनामग्रामः ब्राह्मणेभ्योंऽशतया दत्तः । अपि च गुद्रहारविषये अरुतंकूराश्रये पल्लिवाडग्रामः असनपुरवास्तव्यस्य काश्यपगोत्रस्य नूवुचूद्वित्रिवेदस्य तैत्तिरीयसब्रह्मचारिणः वेदवेदाङ्गेतिहासपुराणन्यायानेकधर्मशास्त्रविदः अग्निष्टोमादिपौण्डरीकपर्यन्तानेकक्रतुयष्टुः ध्रुवशर्मणः पौत्राय वेदवेदाङ्गविदः दोचिशर्मणः पुत्राय अधीतवेदद्वयाय ध्रुवशर्मणे आत्मपुण्याभिवृद्धये आत्मनो विजयपञ्चमे संवत्सरे फाल्गुणमासे अमावास्यायां सूर्यग्रहणनिमित्ते सर्वकरपरिहारेण दत्तः ॥

तस्य विष्णुवर्धनमहाराजस्य प्रियतनयः समतिशयितपितृगुणशक्तिसम्पन्नः आन्वीक्षिक्यादिविद्याप्रगेषु विजयसिद्धिः स्वासिधारणानमितरिपुनृपतिमकुटतटघटितानेकमणिकिरणरागरञ्जितचरणयुगलः परमब्रह्मण्यो मातापितृपादानुध्यातः श्रीसर्वलोकाश्रयमहाराजो माङ्गियुवराजः पञ्चविंशतिवर्षाणि राज्यमपालयत् । तेन क्रञ्जवास्तव्याय काश्यपगोत्रायापस्तम्बसूत्राय तैत्तिरीयसब्रह्मचारिणे कुलिशर्मणः पौत्राय द्रोणशर्मणः पुत्राय कुण्डिदोणशर्मणे कर्मराष्ट्रे नुतुलपरुनामग्रामे दक्षिणदिशायां पदन्तक्षेत्रं उत्तरायणनिमित्ते उदकपूर्वं सर्वकरपरिहारेण दत्तं प्रवर्धमानविजयराज्यसंवत्सरे विंशे ॥

तत्सूनुर्जयसिंहस्त्रयोदश वत्सरान् तद्दैमातुरानुजः कोक्किलिः षण्मासान तस्य ज्येष्ठो भ्राता विष्णुवर्धनस्तमुच्चाट्य सप्तत्रिंशत्संवत्स-

रान् वेङ्गीमण्डलमपालयत् । तस्य प्रियतनयो निजभुजनिशितासिधारात्रशमितपरचक्रविक्रमः विविधयुद्धलब्धविजयसिद्धिः शक्तित्रयालङ्कृतः क्षीरसागर इव लक्ष्मीप्रभवः दिनकर इव सततरक्षितपद्मः शशधर इव कुमुदवनप्रियः धर्मज इव निजधर्मनिर्मलः धर्मजानुज इव दुःशासनक्षयकरः मेरुरिव स्थिरस्थितिः अतुलतुलाधृतकलधौतदुर्बलमलिनः अनेकतुलाधृतशातकुम्भविश्राणनावदातशरीरः परमब्रह्मण्यो विष्णुरिव जिष्णुः समस्तभुवनाश्रयः श्रीविजयादित्यमहाराजाधिराजपरमेश्वरभट्टारकोऽष्टादशवर्षाणि भुवमपालयत् ॥

तस्य प्रियतनयः चक्रवर्तिलक्षणोपेतः चक्रधर इव लक्ष्मिवल्लभो भास्वानिवोपजायमानोदयः चन्द्र इव जगदाह्लादनकरः सुरगज इव दानवर्षी जलनिधिरिव गम्भीरसत्वो युधिष्ठिर इव भीमसेनान्वितः कार्तिकेय इवाप्रतिहतशक्तिः शक्तित्रयोपेतश्चतसृषु नृपविद्यासु विचक्षणो युद्धेषु विषमसिद्धिरर्थिजने कामधेनुः स्त्रीषु मकरध्वजो रिपुतिमिरविध्वंसने प्रलयादित्यो ज्वलत्प्रतापानलज्वालावलीढरिपुनृपः श्रीघ्रपवनो विजिगीषुर्धर्मविजयी परमब्रह्मण्यः परममाहेश्वरः सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजः षट्त्रिंशदब्दान् राष्ट्रमपालयत् । तस्य स्फुरितकरवालधारावशीकृतारातिभूमण्डलस्य स्वचरितन्यक्कृतनृगनलनहुषाम्बरीषययातेर्विष्णोरिव स्वचक्रनन्दकस्य विष्णुवर्धनमहाराजस्य प्रियतनयः प्रतापानुरागावनतसमस्तसामन्तमौलिलालितशासनः क्षत्रोचितशक्तित्रयपात्रीभूतः अनेकसङ्ग्रामविजयासादितविक्रमधवलः यमदण्डचण्डदोर्दण्डमण्डलाग्रनखखण्डितरिपुकरिगण्डस्थलो नरेन्द्रमृग-

राजः अरातिषड्वर्गनिग्रहकरः समधिगतराजविद्याचतुष्टयः चतुरुपाय-प्रयोगचतुरः दुष्टनिग्रहशिष्टानुग्रहकरः मधुमथन इव स्वविक्रमाक्रान्त-भुवनः युधिष्ठिर इव भीमार्जुनपराक्रमसहायः दशरथसुत इव सीता-नन्दनकरः मनुरिव सन्मार्गदर्शी पद्माकर इव अरितिमिरनिकरवि-ध्वंसनादित्यः परमब्रह्मण्यः परममाहेश्वरः समस्तभुवनाश्रयश्रीविज-यादित्यमहाराजाधिराजपरमेश्वरभट्टारकः वादिविषयनिवासिभ्यः वेद-वेदाङ्गरतेभ्यः षट्कर्मनिरतेभ्यः चतुर्विंशतिब्राह्मणेभ्यो चन्द्रग्रहणनिमित्ते उदकपूर्वं कोर्परुनाम ग्रामः सर्वकरपरिहारं कृत्वा दत्तवान् । तेन मिनमिनिवास्तव्याय काश्यपगोत्रायापस्तम्बसूत्राय तैत्तिरीयब्रह्म-चारिणे तुर्कवर्मद्विवेदिपौत्राय वेदाङ्गविदे षट्कर्मनिरताय द्रोणशर्म-द्विवेदिपुत्राय ब्राह्मणगुणगणालङ्कृताय पद्मभट्टारकाय सूर्यग्रहणनिमित्ते कण्डेरुवाती विषये.....ग्रामे द्वादशवेण्डिककोद्रवबीजसंस्थितं... आवासनं सर्वकरपरिहारेण दत्तम् ॥

गङ्गरट्टबलैः सार्धं द्वादशाब्दानहर्निशम् ।
भुजार्जितबलं खड्गसहायो नयविक्रमैः ॥ ४१

अष्टोत्तरं युद्धशतं युध्वा शम्भोर्महालयान् ।
तत्सङ्ख्ययाकरोद्वीरो विजयादित्यभूपतिः ॥ ४२

कृत्वा राज्यं स वेङ्गीशः स चत्वारिंशतः समान् ।
चतुरुत्तरसङ्ख्यातान्ययौ सख्यं शचीपतेः ॥ ४३

तत्सूनुर्नयविद्वीरः कल्यादिर्विष्णुवर्धनः ।
वेङ्गीनाथः समस्तानामायुधानां कलौ कृती ॥ ४४

वर्णाश्रमस्थितिनियोजनदक्षरक्षा-
शिक्षापरः परपुरञ्जयसक्तबाहुः ।
नित्यं त्रिवर्गपरिपालनतन्त्रिमन्त्रि-
संवर्धिताखिलधरातललब्धतेजाः ॥ ४५

गजवाजियुद्धकुशलः सार्थसंवत्सरं पतिः ।
बभूव राज्ये नयविदभिषिक्तः कुलोन्नतेः ॥ ४६

तत्सुतोऽजनि समस्तभूभृतां शासकः सकलसम्पदां पतिः ।
धैर्यदानधृतिधर्मनिर्मलश्रीप्रतापधरमूर्तिविश्रुतः ॥ ४७

समरनिरतारातिव्रातानेकधरेश्वरान्
प्रकृतिबलसम्पन्नस्तेजस्तातिक्रमजोन्नतिः ।
विलसदसिना जित्वा सूर्यं प्रतापयशोमयैः
जगति विजयादित्यो नित्यं गुणैश्च जिगाय सः ॥ ४८

गङ्गानङ्गजवैरिशक्तिरसमान्द्वेशसञ्चोदितो
जित्वा मङ्गिशिरोऽहरद्युधि महाबाह्वाप्तवीर्यार्यमा ।
कृष्णं सङ्कुलमङ्कितास्खिलबलप्राप्तोरुसद्विक्रमो
भीतार्तौ च विधाय तत्पुरमरं यो निर्ददाह प्रभुः ॥ ४९

स समस्तभुवनाश्रयश्रीविजयादित्यश्चतुश्चत्वारिंशद्वर्षाणि वेङ्गी-देशमपालयत् । तदनु सवितर्यस्तं गते तिमिरपटलेनेव रट्टदायादबले-

नाभिव्याप्तं वेङ्गीमण्डलं तदनुजविक्रमादित्यसूनुश्चलुक्यभीमाधिपो द्रोहार्जुनापरनामा स्वविक्रमैकसहायतरवारिप्रभयावभास्याधिपतिरभूत्किल । दीनानाथनग्ननटगायकधर्मध्वजवृत्तीनां पितराविव सखेव गुरुरिवाभिलषितं वितीर्य कल्पतरुप्रतिमश्चेतांसि दानेन सन्तर्प्य त्रिंशद्वर्षाणि पालयित्वात्मगुणैः पुरन्दरमानन्दयन्निव तत्सख्यमगमत् ॥

तत्पुत्रस्तदनन्तरेण विजयादित्यो विजित्याहवे
स्वेनैकेन गजेन वारणघटारूढान् कलिङ्गाधिपान् ।
आरुह्योज्ज्वलहेमकल्पिततुलाकोटिं वदान्यो जय-
स्तम्भं कीर्तिमयं निधाय विरजे षण्मासमासीन्नृपः ॥ ५०

जीवत्येव प्रतापात्पितरि भुजबलध्वस्ततद्वैरिवर्गः
पश्चाज्जित्वारिवर्गं निजमजितमहाशक्तिसम्पन्नमन्त्रः ।
प्रज्ञाचक्रेण बाह्यां रिपुसमितिमपि स्वार्थभोगैः कृतार्थो
राज्याशीर्लब्धतेजाः समबलमधिपो जेतुमिन्द्रं प्रयातः ॥ ५१

तत्सूनुरुदयादित्य इवाम्भो राजमहेन्द्रापरनामा रिपुतिमिरमारान्निहत्य प्रकृतिसपत्नपक्षनिक्षिप्तसामन्तकुल्यकुटिलमनोभङ्गकरं करवालमुत्कृष्य शक्तित्रयसम्पन्नप्रतापावर्जितपितृपितामहप्रकृतिबलः प्रज्ञया सुरगुरुं तेजसा भानुमन्तं क्षमया क्षमाममरगिरिं विविधबुधसमाश्रयतयानुकुर्वन्सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजः सप्तवर्षाणि भूमण्डलं ररक्ष ॥

यस्य पादाम्बुजच्छायामाश्रितं राजमण्डलम् ।
दण्डितारातिकोदण्डं मण्डितं मण्डलत्रये ॥ ५२

कुन्देन्दुधवलं यस्य यशो रञ्जितभूतलम् ।
गायन्ति गलितारातेर्विद्याधर्योऽपि वीणया ॥ ५३

स स्वराज्याभिषेककृतकल्याणः सिंहासनारूढः स्वकुलकल्याणपरम्परानियोगाधिकृतपट्टवर्धनीवंशाग्रण्या कल्लकम्प इति विश्रुतेन कुब्जविष्णुवर्धनानुचरेण सङ्ग्रामे तदनुज्ञया दुर्धर्षबलं दद्दरनामानं विनिहत्य तच्चिह्नानि येन जगृहिरे तत्कुलप्रसूतसोमादित्यस्य सूनुरनेकयुद्धलब्धप्रतापः प्रतिवियराजः ॥

तत्सूनुः सकलारातिमदच्छेदकरायुधः ।
सेवको विजयादित्यकलियर्त्यङ्कभूभुजः ॥ ५४

अभैषुर्भण्डनादित्यं दृष्ट्वा प्रतिमुखाञ्जनम् ।
प्राप्तमुज्ज्वलगण्डाङ्कं यं परे यमसंनिभम् ॥ ५५

यो हि—

शत्रूणां तुमुलेषु वीरपटहं संश्राव्य जित्वा बलं
कुन्तादित्य इति श्रुताङ्कितमहाकीर्तिप्रतापालयः ।
तच्चित्तं परितोष्य भृत्यपदवीं लब्ध्वा प्रसादं गतः
स्फीतानेकबलारिभूपविजयश्रीजन्मबाहून्नतिः ॥ ५६

तस्मै सद्वादशग्रामटिकं गोण्टूरुनामग्रामं सर्वकरपरिहारीकृत्य ददौ । अपि च ।

चालुक्यभीमभूपालधात्री धात्रीव चापरा ।
क्षमया क्षत्रियप्राया नागिपोटिरिति श्रुता ॥ ५७

आसीत्तस्याः सुता गामकाम्बा नामाम्बिकासमा ।
मातुः स्तन्यं समीकृत्य भीमराजेन या पपौ ॥ ५८

साजीजनत्कुमारं तु शक्तियुक्तं कुमारवत् ।
भीमराजस्य सेनान्यं महाकालं महामतिम् ॥ ५९

यश्चानेकशः अन्योन्यास्त्रसमायोगसञ्जातगो(श्री ?)महाहवे स्वामिनोऽग्रसरो धीरो रिपुसैन्यमनीनशत् । किञ्च रूपेण मनसिजः कोपेन यमः शौर्येण धनञ्जयः साहसैः शूद्रकः । तस्मै द्रुज्जूरुनाम-ग्रामस्तेन सर्वकरपरिहारेण मान्यीकृत्य दत्तः ॥

तदग्रसूनुर्बालः कृतकण्ठिकापट्टबन्धाभिषेको विजयादित्यः पक्षमेकम् । तमाक्रम्य कारागारे निधाय चालुक्यभीमपितृव्यो युद्धमल्लात्मजस्तालपनृपो मासमेकं राज्यं पर्यपालयत् ।

तं जित्वा युधि चालुक्यभीमभूमिपतेः सुतः ।
विक्रमादित्यभूपोऽपान्मासानेकादश क्षितिम् ॥ ६०

तं जित्वा युधि भीमसन्निभबलो भीमोऽम्मसूनुर्भटः
सन्मासाष्टकमावदेव वसुधां व्यापाद्य तं संयुगे ।
ताहज्येष्ठसुतोऽथ मल्लनृपतिः सप्तान्वपाद्वत्सरा-
नुत्सार्याथ तमग्रहीत्कुलभुवं पट्टेन भीमो नृपः ॥ ६१

निर्जित्यार्जुनसंनिभो जनपदात्तं निर्गमय्योद्धतान्
दायादानिनभानुलीनभगणाकारान्विधायेतरान् ।
वश्रीवोर्जितनाकमम्मनृपतेर्भ्राता कनीयान्भुवं
भीमो भीमपराक्रमः समभुनक् संवत्सरान्द्वादश ॥ ६२

तस्यैव व्यसनमिह त्रयं च जातं
शास्त्राशाभ्यसनमनिन्दितं च भूयः ।
संरक्षा सकलजनस्य शास्त्रदृष्ट्या
सन्दानं बुधजनसात्कृतं समानम् ॥ ६३

मेलाम्बायां द्युतिनुतिमतिश्रीधृतिक्षान्तिमत्यां
अत्यादित्यो जगति विजयादित्य आजीजनद्यम् ।
धर्मेन्द्राग्नित्रिनयनधनेशोदकेशादिधर्मः
सेनानाथं त्रिपुरमथनः कन्यकायां यथाहुः ॥ ६४

मित्राराविन्दप्रतिबोधहेतुः प्रद्वेषिनीहारविघातहेतुः ।
यस्योच्छ्रितं तेज इहैजते कौ तेजस्विनस्तेज इवातिपूतम् ॥ ६५

स सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजाधिराजः परममाहेश्वरः परमब्रह्मण्यो मातापितृपादानुध्यातश्चालुक्यभीमगण्डमहेन्द्रः सिंहासनमधिरूढः—

श्रीमान्गौतमगोत्रजो द्विजवरः सद्वर्त्मगः पुण्यभा-
माददे वसुधामपि क्षितितलाधीशैः सुवंशोद्भवैः ।

गिरिरसवसुसङ्ख्याब्दे शकसमये मार्गशीर्षमासे च ।
कृष्णत्रयोदशदिने भृगुवारे मैत्रनक्षत्रे ॥ ७५

धनुषि रवौ घटलग्ने द्वादशवर्षे तु जन्मनः पट्टम् ।
योधादुदयगिरीन्द्रे रविरिव लोकानुरागाय ॥ ७६

यस्मिन् शासति नृपतौ परिपक्वानेकसस्यसम्पच्छालिः ।
सततपयोधेनुरभीर्निरीतिरपरुग्निरस्तचोरो देशः ॥ ७७

यो रूपेण मनोजं विभवेन महेन्द्रमहिमकरमुरुमहसा ।
हरमरिपुरहननेन न्यक्कुर्वन् भाति विदितदिगवनिकीर्तिः ॥ ७८

स सकलरिपुनृपतिमकुटतटघटितमणिगणमधुकरनिकरपरिचुम्बितचरणसरसिरुहयुगलो युगलोचनपदकमलविलसद्विरेफायमानो मानोन्नतानतोद्धतसमस्तलोकः समस्तभुवनाश्रयश्रीविजयादित्यमहाराजाधिराजः परमेश्वरः परमभट्टारकः परमब्रह्मण्यः क्ष्मां पञ्चविंशतिवर्षाण्यपात् ॥

जगति प्रथितं धरामराणां चरणं वाजसनेयमस्ति भूयः ।
श्रुतिचोदितधर्मयुक्तं वरयोगीश्वरयाज्ञवल्क्यगृह्यम् ॥ ७९

तत्राभवद्भरद्वाजगोत्रः पात्रं द्विजोत्तमः ।
कल्वटोरुनिवास्तव्यो नाम्ना पालियपेद्दियः ॥ ८०

तस्यापि गुण्डशर्मासीत्सूनुरूनेतरः प्रभुः ।
गुणी घृणी धनी दानी मानी मानवपूजितः ॥ ८१

तस्याभवत्पण्डियनामधेयः सतां विधेयो नुतरूपधेयः ।
पुत्रो यमत्रस्तमनाः पवित्रत्रय्यीसमाचारविचारनिष्ठः ॥ ८२

तस्मै स्वपादाराधनतत्पराय ब्रह्मचारिणे कर्पटिकाय पेन्नातवाडिविषये पडङ्कलूरुनामा ग्रामः सर्वकरपरिहारमग्रहारीकृत्य सोमग्रहणनिमित्तं तेन राज्ञा दत्तः । अपि च । पट्टवर्धिन्याः पम्मवाख्यायाः सुताय युवराजबल्लालदेववेलाभटाय बोदियनाम्ने गुद्रवाडविषये पाम्बरुनामग्रामस्य दक्षिणस्यां दिशि क्षेत्रद्वयं अम्मराजो राजमहेन्द्रो दत्तवान् । किं च ।

विद्वत्कवीन्द्रप्रभवं प्रसिद्धं पूज्योदयं भूरिगुणाधिवासम् ।
धर्मिष्ठभूमिर्नियमस्वधाम पात्रं परं काश्यपगोत्रमासीत् ॥ ८३

तत्र भूसुरयथोचितविद्याकर्मषट्कविधिनिर्मलदेहः ।
वेदविद्विदितशास्त्रसमूहो विद्दमय्य इति विश्रुतकीर्तिः ॥ ८४

भूदेववंशाम्बुधिशीतरश्मिर्विद्वत्सरोजाकरभानुभानुः ।
तत्सूनुरम्भोजभवोपमानो विद्यामयो विद्दमियप्रसिद्धः ॥ ८५

अरुन्धत्या विशिष्टस्य वसिष्ठस्योपमामयात् ।
पतिव्रतात्मया धर्मपत्न्या यश्चानमव्वया ॥ ८६

कुलक्रमायातमुदारभावमनन्यदृष्टाश्रुतपूर्वरूपम् ।
दधद्धराधारिधरोपमानस्तयोः सुतः कोरमियाभिधानः ॥ ८७

श्रीलोकमहादेव्या समवर्ध्यत यस्तदम्बया प्रीत्या ।
चातुर्यनागरकयोरावासस्थानमिति मनोहरयोः ॥ ८८

अपहसति वाग्मिता वाग्वनितां यत्र स्थिता महाचतुरे ।
असुजनधारानागरकजलजभवबहुमुखप्रियां सततम् ॥ ८९

उत्पद्यते प्रसङ्गात्सुजनतया चात्मसहजया यस्य ।
विभवः पतिप्रशंस्यश्चित्रमिदं साधुवाद इति ॥ ९०

रसिकानामतिरसिकश्चतुराणामधिकचतुर एवायम् ।
कोरमियनामधेयो विदुषामत्यन्तविज्ञानी ॥ ९१

सेवितसमस्तभूपतिहृदयस्थितिभाग्गुणोपपन्नोऽमूल्यः ।
मुक्ताफलसच्चरितः कोरमियो वास्तुपुरुष इत्युपपन्नम् ॥ ९२

अनागतज्ञानविवेकिनी धीरनिन्द्यचारित्रपरा हि चेष्टा ।
अशेषभोगोपगतं मनश्च अहो महत्कोरमियस्य पुण्यम् ॥ ९३

तस्मै कोरमियनाम्ने सुवर्णभाण्डागारश्रीकरणमुख्याय एलवरुनामग्रामः सर्वकरपरिहारेणाग्रहारीकृत्योदकपूर्वमुत्तरायणनिमित्ते तेनाम्मराजेन दत्तः ।

अपि च—

सत्यस्य जन्मभूमिः सज्जनसंसेवितः सरोनाथः ।
विक्रमगुणैकधामा नृपकामः पूजितेशपदकमलः ॥ ९४

रूपलावण्यसौभाग्यसत्यधर्मपरायणा ।
नायमाम्बाङ्गना तस्य सरोरुहदलेक्षणा ॥ ९५

ताभ्यां स्वश्वशुरश्वश्रूभ्यां प्रार्थ्यमानः सोऽम्मराजः कल्लूरुग्रामवास्तव्यभारद्वाजगोत्रवाजसनेयवामनभट्टपौत्राय सिव्वनभट्टपुत्राय

वामनशर्मणे गुण्टुगोलनुनामग्रामे पूर्वदिशि राजमानेन द्वादश-खोण्डिकोद्रवबीजवापक्षेत्रमुदकपूर्वमुत्तरायणनिमित्ते सर्वकरपरिहारेण शासनीकृत्य ददौ ।

द्वैमातुरोऽम्मराजस्य दानार्णव इति स्मृतः ।
चतुःषष्टिकलाभिज्ञः समास्तिस्रोऽभुनग्भुवम् ॥ ९६

ततः परं पतिं लब्धुमनुरूपमनायिका ।
सप्तविंशति वर्षाणि चचारेव तपः क्षमा ॥ ९७

अथ दानार्णवाज्जातः कलावान्मृदुभिः करैः ।
राजा चालुक्यचन्द्रो यः क्षमातापमपाकरोत् ॥ ९८

सत्ये प्रतिष्ठिता लोका इति सत्यं वचो यतः ।
सर्वलोकाश्रये यस्मिन्सत्यराजे स्थितं जगत् ॥ ९९

निर्वक्रं वसुधाचक्रमरक्षत्क्षपिताहितः ।
न्याय्ये पथि नृपैराद्यैः स द्वादशसमाः समः ॥ १००

विमलादित्यदेवाख्यस्ततस्तस्यानुजोऽदधत् ।
महीमण्डलसाम्राज्यं विजित्य विजयी रिपून् ॥ १०१

यस्य प्रज्वलितं प्रतापदहनं सोढुं न शक्ता भया-
द्गत्वा काननमम्बुधिं च तरसा विद्वेषिणो विह्वलाः ।
दावौर्वाग्निपदेन तत्र च पुनस्तेनैव सन्तापिताः
श्रीपादामरपादपस्य महतीं छायां समाशिश्रियन् ॥ १०२

अपि च ।

सूर्यान्वये सुरपतिप्रतिमः प्रभावैः
श्रीराजराज इति यो जगति व्यराजत् ।
नाथः समस्तनरनाथकिरीटकोटि-
रत्नप्रभापटलपाटलपादपीठः ॥ १०३

जातस्ततस्ततयशोजितराजतेजा
राजेन्द्रचोडनृपतिर्नृपचक्रवर्ती ।
दम्बं (?) प्रचण्डमददन्तिकपोलनिर्य-
द्दानाविलामरसरित्सलिलप्रवाहः । १०४

सद्वीपां चतुरम्बुराशिपरिखां विश्वम्भरां लीलया
दण्डेनैव विजित्य च प्रतिदिशं योऽतिष्ठिपत्सर्वतः ।
स्वैरोद्भ्रान्तिनिवारणाय विजयस्तम्भान्स्वनामाङ्किता-
नालानानिव बन्धुमन्धमनसो दर्पेण दिग्दन्तिनः ॥ १०५

तस्यानुजां सुरूपामनुरूपां कुन्दवां महादेवीम् ।
स उपायत कृतकृत्यो विमलादित्यो जनस्तुत्यः ॥ १०६

समुद्ररशनां पृथ्वीं पृथ्वीं स भुजविक्रमात् ।
समरक्षत्समाः सप्त सप्तसप्तिसमः समः ॥ १०७

तस्माच्चालुक्यचूडामणिरथ विमलादित्यदेवान्महीशः
चोडक्ष्मापाललक्ष्म्या इव रचिततनोः कुन्दवायाश्च देव्याः ।

जातः श्रीराजराजो रजनिकरकुलश्रीमदम्भोधिराजो
राजद्राजन्यसेव्यामभृत भुजबलाद्राजलक्ष्मीं पृथिव्याः ॥

यो रूपेण मनोभवं विशदया कान्त्या कलानां निधिं
भोगेनापि पुरन्दरं विपुलया लक्ष्म्या च लक्ष्मीधरम् ।
भीमं भीमभुजावलेन (?) विहसन्भाति स्म भास्वद्यशाः
श्रीमत्सोमकुलैकभूषणमणिर्दीनैकचिन्तामणिः ॥ १०९

यो रक्षितुं वसुमतीं शकवत्सरेषु
वेदाम्बुराशिनिधिवर्तिषु सिंहगेऽर्के ।
कृष्णद्वितीयदिवसोत्तरभद्रिकायां
वारे गुरोर्वणिजि लग्नवरेऽभिषिक्तः ॥ ११०

यस्योत्तमाङ्गं पट्टेन समबन्धि महीयसा ।
भर्तुं विश्वम्भराभारं जनैरारोपितं चिरम् ॥ १११

पृथ्वीमिमां यत्र पृथुप्रभावे रक्षत्यवर्गं क्षपितारिवर्गे ।
दूरीकृतावग्रहचोररोगाः प्रजा लभन्ते सफलं त्रिवर्गम् ॥ ११२

शौर्यौदार्याभिमानाद्यगणितगुणजन्मानुरक्ता महिम्ना
प्रख्यातेनातिकृष्णा शशधरधवला सज्जनानां गणेन ।
पीता प्रीतेन कर्णाञ्जलिभिरभिनवा भाति दिग्देवतानां
नानावर्णा वितानश्रियमतनुतरा तन्वती यस्य कीर्तिः ॥

पित्रोर्वंशगुरू बभूवतुरलं यस्य स्फुरत्तेजसौ
सूर्याचन्द्रमसौ निरस्ततमसौ देवौ जगच्चक्षुषी ।

दंष्ट्राकोटिसमुद्धृताखिलमहीचक्रं महत्क्रीडया
विष्णोरादिवराहरूपमभवद्यच्छासने लाञ्छनम् ॥ ११४

स सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजाधिराजपरमेश्वरपरमभट्टारक परमब्रह्मण्यः मातापितृपादानुध्यातः त्यागसिंहासनासीनः चण्डिका प्रसादपरिलब्धसाम्राज्यचिह्नः ॥

आद्यन्तात्यन्तदूरात्समजनि जगतां ज्योतिषो जन्महेतुः
ब्रह्मा धाम प्रजानामभवदथ ततः कश्यपो नाम वेधाः ।
भारद्वाजस्ततोऽभून्मुनिरधिकतपास्तस्य गोत्रे पवित्रे
तत्रापस्तम्बसूत्रे श्रुतिनिधिरुदगाच्चीडमार्यः क्रमेण ॥ ११५

राज्ञामर्चितवर्चसः समुदितैर्यज्ञैर्विधौतांहसो
यज्ञो नाम सुतस्ततः कृतधियो यज्ञे कृतज्ञः कृती ।
विज्ञाताखिलवेदशास्त्रसमयः प्राज्ञः सदा पोषित-
ज्ञातिर्ज्ञाननिधिर्गुरुज्ञसदृशो नीतिज्ञतायां भुवि ॥ ११६

यथा वसिष्ठो विदुषां वरिष्ठो निरुन्धतीं दोषमरुन्धतीं सः ।
तथानुरूपामभिरूपरूपः सतीमुपायच्छत माकवाख्याम् ॥ ११७

पुत्रस्तयोरदितिकश्यपयोरिवाभू-
द्भास्वानपाकृततमाः खलु चीडमार्यः ।
यो वेदशास्त्रसकलश्रुतिरश्मिजातैः
शिष्याननाम्बुरुहबोधकरो गरीयान् ॥ ११८

नित्याभीष्टफलप्रदानरुचिरं लक्ष्मीनिवासास्पदं
बिभ्राणं गुरुतां प्रबुद्धसुमनः सम्पूर्णशाखान्वितम् ।
छायासन्ततिमाश्रितैश्च विबुधैः संस्तूयमानं सदा
सेवित्वा सुखमास्यते द्विजवरैर्यं विप्रकल्पद्रुमम् ॥ ११९

यद्गेहं सुचिरं विभाति पठतां पुण्यैर्वटूनां पदु-
व्यावृत्त्याविरतं क्रमात्क्षमपदे सामर्थ्यमुद्घोषणैः ।
सायं प्रातरुपाहिता हुतिहृतस्वाहाप्रियप्रोच्चल-
द्धामैश्चापि समन्ततः कलिमलं प्रोत्सारयद्दूरतः ॥ १२०

तस्मै समस्तजनताविशेषकाय रैसुतर्पितमहीदेवदेवगणाय विप्रान्वयाब्धिशशभृत्प्रतिच्छन्दाय विद्वज्जनाङ्गीकृतविश्रुतानन्दाय जन्मप्रभृतिगीतवेदार्थतत्त्वाय सन्मनोवसतिवास्तव्यात्मसत्त्वाय लम्भितसरलत्वपरिलालितचरित्राय शुम्भितमतिस्वसितजीवभृशपुत्राय सिद्धनिजनाथकृतिसेवितमनीषाय शुद्धमतिदूषितसमस्तजनदोषाय सन्ताराधितनिजस्वामिपादाय चिन्तितमनःस्थसुखदाभूतसुपादाय होमधूमविनिर्गतामितकलङ्काय धीमत्प्रगीतरुचिरस्थिरस्वनामाङ्काय सकलमुनिगणनुतापस्तम्बसूत्राय तत्रसङ्गीतभारद्वाजगोत्राय सप्ततन्तुकृतयूपस्तम्भशोभाय सप्ताश्वरूपसदृशात्मतनुलाभाय नित्यजनतोचितसुसत्यगुणयुक्ताय प्रत्यभिलषितकार्यनिष्पत्तिसक्ताय परमपुरुषार्थसम्पादनपटिष्ठाय परमेश्वरस्मरणपालनवरिष्ठाय सकलार्थशास्त्रपरिनिश्चितविनोदाय सुकुमारताधिकसरोजनिभपादाय धाराकरेणाग्रहारीकृतः कोरुमेल्लिनामा ग्राम इन्दूपरागे दत्तः । स राजराजनरेन्द्रः—

चत्वारिंशतमब्दानेकं च पुनर्महीमपालयदखिलाम् ॥ १२१

राजासावनुरूपरूपविभवामम्मङ्गनाम्ना भुवि
प्रख्यातामुपयच्छत स्म विधिवद्देवीं जगत्पावनीम् ।
या जह्नोरिव जाह्नवीं हिमवतो गौरीव लक्ष्मीरिव
क्षीरोदाद्दिवसेशवंशतिलकाद्राजेन्द्रचोडादभूत् ॥ १२२

पुत्रस्तयोरभवदप्रतिघातशक्ति-
निःशेषितारिनिवहो महनीयकीर्तिः ।
गङ्गाधराद्रिसुतयोरिव कार्तिकेयो
राजेन्द्रचोड इति राजकुलप्रदीपः ॥ १२३

भासामुन्नतिहेतुं प्रथमं वेङ्गीश्वरत्वमध्यास्य ।
यस्तेजसा दिगन्तानाक्रमति सहस्रभानुरुदयमिव ॥ १२४

उद्यच्चण्डतरप्रतापदहनप्लुष्टाखिलद्वेषिणा
सर्वान्केरलपाण्ड्यकुन्तलमुखान्निर्जित्य देशान्बलात् ।
आज्ञां मौलिषु भूभृतां भयरुजा चित्तेषु दुर्मेधसां
प्रीतिः सत्सु दिशासु कीर्तिरतुला येनार्पितो जृम्भते ॥१२५

भोगीशाभीलभोगप्रतिमनिजभुजाभर्त्सितात्यन्तविभ्य-
न्नानाभूपाललोकप्रहितबहुविधानर्घरत्नाभिरामम् ।
धत्ते मौलिं पराङ्ख्यौ महति नृपकुले यः कुलोत्तुङ्गदेवो
देवेन्द्रत्वादनूने सुरपतिमहिमा चोडराज्येऽभिषिक्तः ॥ १२६

उदयमिव रविस्त्वं प्राप्य वेङ्गीश्वरत्वं
वितनु शिरसि पादं भूभृतामित्यवोचत् ॥ १३४

इत्याशिषं समुपगम्य नृपादवन्ध्यां
मातुस्तदग्रजनृपद्वितयात्क्रमेण ।
आनम्य तामवरजैः प्रणतः कुमारः
सृष्टः स्वदेशगमनाय स तैः कथंचित् ॥ १३५

शत्रुध्वान्तमपास्य राजनिकरानाच्छाद्य धाम्ना परान्
दुर्वृत्तान्विनिवर्त्य भूकमलिनीं कृत्वा तथा नन्दिनीम् ।
प्रारूढो जननाथनामनगरी हर्म्योदयाद्रिर्विभुः
वेङ्गीभूतलभूषणं नृपसुतो बालार्कबिम्बद्युतिः ॥ १३६

शाकाब्दे शशिखाम्बरेन्दुगणिते सिंहाधिरूढे रवौ
चन्द्रे वृद्धिमति त्रयोदशतिथौ वारे गुरोर्वृश्चिके ।
लग्नेऽथ श्रवणे समस्तजगतीराज्याभिषिक्तो मुदे
लोकस्योद्वहति स्म पट्टमनघः श्रीवीरचोडो नृपः ॥ १३७

यो दीनकोटिमभिवाञ्छितवस्तुदानै-
र्भीतानुपाश्रितभयापनुदा भुजेन ।
रक्षन्समस्तभुवनाश्रयनाम सार्धं
धत्ते प्रजाश्च निजधर्मपरिग्रहेण ॥ १३८

भूलोकादुदिता महोन्नतिमती दिङ्मण्डलव्यापिनी
सङ्क्रान्ताखिलसत्पथा परिगता लोकानथोर्ध्वानपि ।

सन्मार्गाच्चलितां भुवीह पतितां पश्चादधोगामिनीं
गङ्गां कीर्तिरमङ्गलप्रमथिनी यस्यातिशेतेतराम् ॥ १३९

त्यक्त्वा भूभारखेदं फणिपतिरचलं पाति पाताललोकं
सर्वा निर्व्याकुलासीत्परकुपतिपरित्यागिनी मेदिनी च ।
लक्ष्मीभाजां द्विजानामपि मखनिवहैर्नन्दितं देवबृन्दै-
रित्थं त्रैलोक्यमेतद्ध्रुवमतिमुदितं यत्र भूभारभाजि ॥ १४०

अक्षतां यो महीं रक्षन्गुरुणा चक्रवर्तिना ।
आहूतो यौवनोद्दामदेहालक्ष्मीदिदृक्षया ॥ १४१

कान्तिं नवामनुदिनं नयनाभिरामां
पुष्णन्तमिन्दुमिव यं तरुणं नृपेन्द्रः ।
पश्यन्नतृप्तनयनोऽप्यथ पञ्चमाब्दे
प्रास्थापयत्पुनरुदीच्यजयाय सूनुम् ॥ १४२

स सर्वलोकाश्रयः श्रीविष्णुवर्धनमहाराजाधिराजो राजपरमेश्वरः परमभट्टारकः परमब्रह्मण्यः श्रीवीरचोडदेवः—

पावने ब्रह्मवंशेऽभूत्परमाह्लाददर्शनः ।
मुनीन्द्रो मुद्गलो नाम क्षीरोद इव चन्द्रमाः ॥ १४३

येनातर्क्यानुभावेन समाहूते दिवाकरे ।
यस्य यष्टिः समादिष्टा रविचेष्टामचेष्टत ॥ १४४

आसीत्पवित्रचारित्रस्तद्गोत्रे गोत्रवर्धनः ।
दिशो निजयशोधाम्ना द्योतयन्पोतनाह्वयः ॥ १४५

गुणाधिको गुणज्ञेन राजराजाधिपेन यः ।
राजराजब्रह्ममहाराजनाम्ना स्तुतो मुदा ॥ १४६

तस्य पुण्यनिधेः पत्नी कन्नमाम्बा जगन्नुता ।
अत्रेरिवानसूयासीदनसूयगुणोन्नता ॥ १४७

सुतमिव वसुदेवाद्देवकी वासुदेवं
गुहमिव गिरिकन्या नन्दनं चन्द्रमौलेः ।
अथ तनयमसूत श्रीनिधिं सा च तस्मा-
दखिलविबुधसङ्घैरीडितं मेडमार्यम् ॥ १४८

उद्दामधामविमलीकृतदिग्विभागे
नित्योदयस्थितिमति प्रविकासिपद्मे ।
यत्रोदिते निखिलबन्धुकुलानि लक्ष्मी-
रध्यास्त वारिजवनानि विवस्वतीव ॥ १४९

यस्मिन्नाश्रितवत्सले कृतयुगाचारैकधीरे स्थितिं
बिभ्राणा गुणरत्नभूषण इति प्रख्यातनाम्नि स्वयम् ।
सत्यत्यागपराक्रमप्रभृतयः संभूय सर्वे गुणा
वर्धन्ते गुणराशिलोपनिपुणं निर्जित्य कालं कलिम् ॥ १५०

धीरो नित्यानुरक्तो दृढनिशितमतिर्ब्रह्मवंशप्रदीपो
लक्ष्मीभूरिद्धतेजा नयविनयनिधिः शास्त्रशस्त्रप्रवीणः ।
मान्यः शैलेन्द्रसारस्थिर इति च मया सादरं सप्रसादं
सैनापत्येऽभिषिक्तो वहति जनमुदे पट्टमारोपितं यः ॥ १५१

शुश्रूषया गुरुजनं चरितेन लोकं
मानेन बन्धुजनमिष्टधनेन शिष्टान् ।
यो माम्मदीयनिखिलक्षितिराज्यभार-
क्षान्त्याभिनन्दयति भक्तिभरेण शौरिम् ॥ १५२

यस्य प्राङ्गणभूमिषु प्रतिदिनं प्रक्षाल्यमानामित-
क्षोणीदेवसमूहपादविगलद्वारिप्रवाहैः शुभैः ।
शश्वन्मार्गसहस्रपूरिभिरहो गङ्गाप्रवाहा जिता
देवेष्वन्यतमस्य पादगलिता मार्गत्रयायासिताः ॥ १५३

द्राक्षारामे पावने पुण्यभाजा पुण्यक्षेत्रे पीठपुर्यां च येन ।
भोक्तुं प्रीत्या प्रत्यहं ब्राह्मणानामाकल्पान्तं कल्पितं सत्त्रयुग्मम् ॥
चेल्लूरुनामप्रथिताभिरामाशिष्टाग्रहारोत्तरदिग्विभागे ।
महत्तटाकं मधुराम्बुपूर्णमूचीकरद्यः करुणारसात्मा ॥ १५५

विप्रैरगस्त्यप्रतिमैरसंख्यैर्नित्योपभोग्येन शशिप्रभेण ।
यद्वारिणाब्धिं हसतीव भूयो निःशेषपीतं कलशोद्भवेन ॥ १५६

महौजसा तेन महामहिम्ना ग्रामस्य तस्यापरदिग्विभागे ।
निर्मापितं धर्मपरायणेन विष्णोर्गृहं वैष्णवपुङ्गवेन ॥ १५७

समुन्नते चन्द्रमरीचिगौरे लक्ष्मीनिवासे नयनाभिरामे ।
तत्राविरासीत्स्वयमेव देवो लक्ष्मीपतिर्लक्षितशङ्खचक्रः ॥ १५८

तस्मै श्रीविष्णुभट्टारकाय प्रत्यहं चरुबलिपूजार्थं खण्डस्फुटित-नवकर्मार्थं च भवद्विषये कोलारू नाम ग्रामः सर्वकरपरिहारेण देवभोगीकृत्य उदकपूर्वकमदात् श्रीविजयराज्यसंवत्सरे एकविंशे ।

अपि च—

वेदानां परिरक्षणे कृतमतिर्देवादिदेवस्तप-
स्तप्त्वा सञ्जनयाम्बभूव भगवान्.....ब्राह्मणान् ।
यैराश्चर्यमहानुभावभवनैरग्नौ यथा चोदितं
सायं प्रातरिहार्पितेन हविषा जीवन्ति देवा दिवि ॥ १५९

दुष्टो जात्या प्रकृत्या कलुषितहृदयः क्रूरकर्मापि येषा-
मेकं विप्रं प्रसाद्य प्रशमितदुरितः स्वर्गमाप्तस्त्रिशङ्कुः ।
राज्ञां वंशे विराजन्बहुसुकृतबलाद्देवराज्येऽभिषिक्तो
येषामेकस्य कोपात्प्रभुरपि नहुषः पातितो नाकलोकात् ॥

आज्ञाविधेयानि भवन्ति यस्य
जगन्ति सर्वाणि स चन्द्रमौलिः ।
विधाय येषां विधिवत्सपर्यां
त्रिलोकनाथस्त्रिपुरं विजिग्ये ॥ १६१

येषां प्रभावेण सहस्रधामा रक्षांसि सन्ध्याद्वितये विधूय ।
विभाति निर्विघ्नवियत्प्रचारो जगन्ति रक्षञ्जगदेकचक्षुः ॥ १६२

वंशेषु तेषां ऋषिपुङ्गवानां विख्यातभूदेवकुलोत्तमेषु ।
प्रशस्तवाक्याः शुभलक्षणाङ्गा ये भान्ति वेदा इव मूर्तिमन्तः ॥

ये वाङ्मयाम्भोनिधिसारतत्त्वज्ञानोज्वलत्कौस्तुभरत्नभासा ।
कृतप्रकाशं हृदयं दधाना विभान्ति विष्णोरिव मूर्तिवेदाः ॥

तेभ्यः षट्त्रिंशदुत्तरपञ्चशतसंख्येभ्यः षट्कर्मनिरतेभ्यो न्यूनाधिकभावेन चतुश्चत्वारिंशदधिकपञ्चशतसंख्यान्भागान्परिकल्प्य भवद्विषये द्वादशपूण्डिसहितमालवेल्लिनामग्रामः पोन्नतो..... नामग्रामश्च उत्तरवरुसविषये आलमिनामग्रामश्चेति ग्रामत्रयमेकीकृत्य श्रीवीरचोडचतुर्वेदिमङ्गलनाम्ना सुप्रतिष्ठाग्रहारीकृत्य प्रतिसंवत्सरमत्र प्रतिभागं सार्धं निष्कं करं परिकल्प्य यदतोऽन्यत्सिद्धाया वेण्डाया-भिनवादिकं यच्च क्रोड.....शुल्कनामकं यच्च वणिग्भ्यः पूर्णोपजीवि-भ्यश्च राजग्राह्यं तत्सर्वं परिहृत्य सर्वकरपरिहारेण धारापूर्वकमाच-न्द्रार्कमुत्तरायणनिमित्ते ददौ श्रीविजयराज्यसंवत्सरे त्र्युत्तरविंशति-संवत्सरे । अत्र व्याकरणं व्याचक्षाणस्य वृत्त्यर्थं भाग एकः मीमां-साव्याख्यात्रे द्वौ वेदान्तं व्याख्यातुरेकः ऋग्वेदमध्यापयितुरेकः यजुर्वेदमध्यापयितुरेकः सामानि गापयितुरेकः रूपावतारं व्याचक्षाण-स्यैकः पुराणं वाचयितुरेकः वैद्यस्यैकः अम्बष्ठस्यैकः विषवादिन एकः ज्योतिर्विद एकः इति गुणवृत्तिभागा द्वादश । ग्राममध्यमधि-वसते विष्णुभट्टारकाय भागौ द्वौ पश्चिमं दिग्भागमधिवसते च द्वौ श्रीकैलासदेवाय द्वौ इतराभ्यो वसुदेवताभ्यः एकः इति सप्त देव-भागाः ॥

स कुलोत्तुङ्गचोडदेवः एकोनपञ्चाशद्वर्षाणि क्षितिमन्वरक्षत् । तज्ज्येष्ठसुतो विक्रमचोडः पञ्चदशाब्दान्भुवमन्वपालयत् । तत्पुत्रे

श्रीकुलोत्तुङ्गचोडदेवे राज्यं प्रशासति तद्वंशराजप्रसादलब्धनानादेश-परिवृतं परम्परागतमण्डलेशाधिष्ठितं वेङ्गीमण्डले महासरः स्थिरत-रमस्ति ।

तत्रासीत्सरसीपुरीति जलधौ विष्णोः पुरीं द्वारका-
मुद्यल्लावणवारिदोषकलुषां न्यक्कुर्वती यानिशम् ।
मातेव स्वपयःप्रवाहनिवहैः सुस्वादुभिः सादरं
स्वाङ्कं संश्रितमण्डलेश्वरमहीचक्रं स्वयं रक्षति ॥ १६५

गर्वाद्यद्विजिगीषया रिपुगणाः सम्प्राप्य वेलातलं
लोलत्स्यन्दनवाजिवारणभटा जेतुं न शक्ताः पुनः ।
युद्धालोकनलोलवैरिललनासोल्लासहासोदया-
लज्जावद्वदनाः प्रविश्य सरसीं यान्त्येकतां कर्दमैः ॥ १६६

तस्याः पतिः कोलनिकाटमनायकोऽभू-
त्प्रख्यातधर्मनिचयः प्रततोरुकीर्तिः ।
स्फूर्जत्स्वबाहुबलनिर्जितवैरिवर्गः
सर्वाश्रयो नयनिधिर्भुवि सत्यसन्धः ॥ १६७

यो धर्मे धर्मपुत्रप्रतिनिधिरवनित्राणने कार्तवीर्यः
प्रायः शौर्ये किरीटी स्फुटमहिमरुचा तुल्य एव प्रतापे ।
औदार्ये कर्णकल्पः स्मर इव वपुषि क्ष्मासदृक्षः क्षमायां
सौजन्ये यस्य लोके कथमपि सदृशो विक्रमादित्य एव ॥

योऽदृश्यत सतां भूत्यै जलदुर्गे श्रिया सह ।
भुवनत्रितयं भासा भासयन्व्योम चन्द्रवत् ॥ १६९

यः सर्वामवनिमरक्षदक्षतश्रीः सेनाभिर्बहुरणकेलिनिर्जितारिः ।
वीरश्रीवदनविलासदर्पणाभो नीतिज्ञो नियमितवागतिप्रगल्भः ॥

द्विजजनपरिरक्षादक्षमक्षय्यलक्ष्मीं
प्रशमितरिपुपक्षं कांक्षिणां कल्पवृक्षम् ।
गुणमणिगणकृत्ताकल्पमाकल्पमुर्व्या
धृततनुमिव धर्मं मन्वते मानवा यम् ॥ १७१

सुधृता येन धरित्री निःशङ्कं निर्जितारिवर्गेण ।
चिरतरकालं कृतिना कृतयुगवच्छ्रीसमृद्धेयम् ॥ १७२

विदुषां बहवो ग्रामा देवानां भूरिहर्म्याणि ।
जलपरिपूर्णतटाका देशे देशे विनिर्मिता येन ॥ १७३

यस्मिन्काङ्क्षाबहुलं ददति द्रव्यं प्रभूतमर्थिभ्यः ।
उपपदरहिता जाताश्चिन्तामणिकामधेनुकल्पागाः ॥ १७४

यस्यासिधारासुनिपीतमम्बु द्विषच्छिरश्छेदनकर्महेतु ।
प्रवर्तुलं वैरिपुरं त्रिनेत्रेष्वश्रुच्छलेनेव कृतस्वकार्यम् ॥ १७५

यत्खड्गहस्तपरिपातमदान्धमत्त-
मातङ्गमस्तकविनिर्गतमौक्तिकौघैः ।
संयत्यरातिनिकरान्हसतीव नाना-
दिक्कं पलायनपरान्महती जयश्रीः ॥ १७६

कीर्तिर्यस्य मनोहरा त्रिभुवनं विभ्राजयन्ती भृशं
स्वच्छासत्कुमुदाकरप्रियकरी दिङ्मण्डलं तन्वती ।
कुर्वाणापि सदा समस्तजगतां हर्षं द्विषद्योषितां
वक्त्राम्भोजसुदुःसहा विजयते ज्योत्स्नेव शीतद्युतेः ॥ १७७

स स्वामिनश्चोडदेवस्य तस्य प्राप्य प्रसादादथ ग्रामवर्यम् ।
लक्ष्मीपतीशप्रसादाप्तलक्ष्मीर्दातुं द्विजेभ्यो धियं सन्दधार ॥ १७८

ततश्च—

शाकाब्दानां प्रमाणे रसविशिखवियच्चन्द्रसङ्ख्यां प्रयाते
देशे सावत्तिलीति क्षितितलविदिते पोण्डुवग्रामयुक्तम् ।
सार्द्रर्क्षे पूर्वपक्षे विषुवति सुतिथौ मण्डदोरग्रहारं
प्रादाद्विद्वद्द्विजेभ्यः स्थिरतरमकरं काटदण्डाधिनाथः ॥ १७९


तथैतद्ग्रामसीमान्तर्वर्त्तिनो ये कुटुम्बिनः ।
विट्छूद्रतक्षरजककर्मारतिलपूतकाः ॥ १८०

सुवर्णकंसचर्मान्त्यकुम्भकाराश्च नापिताः ।
अजगोपालकाश्चैव चण्डालाद्यास्तथापरे ॥ १८१

तैर्देयकरमप्येभ्यो ब्राह्मणेभ्योऽददात्तदा ॥ १८२

printed by V. Ramaswamy Sastrulu & Sons, at the 'Vavilla' Press, Madras.

GENEALOGY OF THE CHALUKYA KINGS.



E.—A grant apparently from Mattewada in the Kistna district, Madras Presidency.
Ind. Ant. vii. p. 191.

5. MANGI-YUVARAJA.

25 years. A.D. 672 to 695.

F.—A grant from an unknown place.
Ind. Ant. xx. p. 104.

6. JAYASIMHA (*Jayasimha II*)

13 years. A.D. 696 to 709.

7. KOKKILI

6 months. A.D. 709.

8. VISHNUVARDHANA (*Vishnuvardhana III*)

37 years. A.D. 709 to 746.

9. VIJAYADITYA (*Vijayaditya I*)

18 years. A.D. 746 to 764.

10. VISHNUVARDHANA (*Vishnuvardhana IV*)

36 years. A.D. 764 to 799.

11. NARENDRA-MRIGARAJA. (*Vijayaditya II*)

44 years. A.D. 799 to 843.

G.—A grant from an unknown locality.
South Ind. Inscrip. i. p. 31.

H.—A grant from Idara in the Kistna district, Madras Presidency.
Ind. Ant. xiii p. 55 = PLM. 77.*

* PLM. = Prachina-lekha-mala.

12. KALI-VISHNUVARDHANA (*Vishnuvardhana V*)

$1\frac{1}{2}$ years. A.D. 843 to 844.

I.—A grant from Ahadanakaram in the Madras Presy.
Ind. Ant. xiii p. 185.

13. GUNAGA-VIJAYADITYA (*Vijayaditya III*)

44 years. A.D. 844 to 888.

J.—A grant from an unknown locality.

14. CHALUKYA-BHIMA (*Bhima I*)

30 years. A.D. 888 to 918.

15. KOLLIBHAGANDA-VIJAYADITYA (*Vijayaditya IV*)

6 months. A.D. 918.

16. AMMA-RAJA (*Amma I*; *Vishnuvardhana VI*)

7 years. A.D. 918 to 925.

K.—A grant from Masulipatam in the Kistna district.
Ind. Ant. viii. p. 76.

L.—A grant from Idara in the Kistna district
Ind. Ant. xiii p. 50 = PLM. 53
South Ind. Inscrip. i. p. 36.

17. VIJAYADITYA (*Vijayaditya V*)

15 days. A.D. 925

18. TADAPA

1 month. A.D. 925.

19. VIKRAMADITYA

11 months. A.D. 925 to 926.

20. BHIMA (*Bhima II*)

8 months A.D. 926 to 927.

21. YUDDHAMALLA

7 years. A.D. 927 to 934.

22. RAJA-BHIMA (*Bhima III*; *Vishnuvardhana VII*)

12 years. A.D. 934 to 945.

M.—A grant from Paganavaram in the Madras Presidency.

Ind. Ant. xiii. p. 213.

N.—A grant from apparently Masulipatam in the Kistna Dist.

O.—A grant from Kolavennu in the Kistna district.

South Ind. Inscrip. i. p. 43.

23. AMMA RAJA (*Amma II*; *Vijayaditya VI*)

25 years. A.D. 945 to 970.

P.—A grant from an unknown locality.

Ind. Ant. vii. p. 15.

Q.—A grant from Masulipatam in the Kistna district.

Ind. Ant. viii. p. 73.

R.—A grant from Yelivarru in the Kistna district.

Ind. Ant. xii. p. 91 = PLM. 68.

S.—A grant from an unknown locality.

Ind. Ant. xiii. p. 248.

T.—A grant from Masulipatam in the Kistna District.
South Ind. Inscrip. i. p. 46.

U.—A grant from an unknown locality.

24. DANARNAVA

3 years. A.D. 970 to 973.

Interregnum of 27 years. A.D. 973 to 1003.

25. SAKTIVARMAN

12 years. A.D. 1003 to 1015.

26. VIMALADITYA

7 years A.D. 1015 to 1022.

27. RAJARAJA-NARENDRA(*Rajaraja I*; *Vishnuvardhana VIII*)

41. years. A.D. 1022 to 1063.

V.—A copper-plate grant from Korumelli in the Godavery District, Madras Presidency.
Ind. Ant. xiv. p. 48 = PLM. 35.

28. RAJENDRACHOLA—KULOTTUNGACHOLA(*Kullotungachola I*)

49 year. A.D. 1063 to 1112.

29. VIKRAMACHOLA

15 years. A.D. 1112 to 1127.

RAJARAJA (*Rajaraja II*)

VIRACHOLA (*Vishnuvardhana IX*)

W.—A grant from Chelluri in the Godavery District.

Ind. Ant. xix. p. 423 = PLM. 52.

South Ind. Inscrip. i. p. 49.

W. a.—A grant from Pithapuram in the Godavery Dt.

Ep. Indica V. p. 74 = PLM. 154.

30. KULOTTUNGACHOLA (*Kulottungachola II*)

Date of Accession A.D. 1127.

X.—A grant from Chellur in the Godavery District.

Ind. Ant, xiv. p. 55 = PLM. 36.

PULIKESIN (*Pulikesin II*) *Satyasraya.*

Y.—An inscription from Aihole in the Kaladgi District, Bombay Presidency.

Ind. Ant. V. p. 67 = PLM. 16.

Z.—A grant from an unknown locality.

Ep. Indica iii. 51 = PLM. 151.

---

ment in Ganga grants which connects their real with their Puranic genealogy. The foundations for this portion of the genealogy are the facts that the Chalukyas did come orginally from the north and found the Pallavas in possession of some of the territories afterwards acquired by themselves, coupled with the Kadamba tradition that the founder of that family was Trinetra or Trilochana.

P. 3, l. 11. With the mountain, Chalukyagiri, we may compare the Nandagiri fort which, according to the Kakatiya legend, was founded by Nanda, the son of Uttungabhuja. Nanda's father, in a similar manner came from Upper India and settled to the south of the Godavary. In a similar fashion, the mountain, Mahendragiri—in this case a really existing mountain—is introduced into the traditions of the Gangas of Kalinga.

P. 3, l. 12. These are the Eastern Chalukya insignia. They are : the white umbrella, the single conch-shell, the *panchamahasabda*, the *paliketana*, the double drum, the boar-crest, the bunch of feathers of a peacock's tail, the spear, the throne, the *makaratorana*, the golden sceptre, the Ganga and the Yamuna, and others which are not particularised. A somewhat similar list of insignia is given in the case of the Gangas of Kalinganagara. The terms Ganga and Yamuna probably denote the images of two Goddesses as personifications of the rivers. These were also Rashtrakuta insignia. These two emblems must have been derived by some means or another, from the early Guptas, in the temples of whose period the

Ganga and the Yamuna, as goddesses, constantly appear as an architectural embellishment.

P. 3, l. 20. Vishnuvardhana became famous afterwards as Jayasimha.

P. 4, l. 1. Ranaraga was also known as Vijayadityat Ranaraga was, perhaps, a title. His mother was of Pallava descent, cf. **तस्यासीद्विजयादित्यो विष्णुवर्धनभूपतेः । पल्लवान्वयजातायां महादेव्याश्च नन्दनः ॥**

P. 4, l. 4. The town Vatapi has not been correctly localised. Perhaps it is the same as the modern Badami, the well-known remains at which are quite enough to show that it was in former times a place of much importance.

P. 4, l. 7. The Nalas were perhaps the rulers of the district known as Nalavadi in the Bombay Presidency; or perhaps a portion of the Kalinga country, including probably the Berars. The Mauryas were evidently the rulers of North Konkana and the Kadambas ruled over the western parts of Belgaum and Dharwar districts and eastern part of North Kanara district. The Kadamba King defeated by Kirtivarman was probably Krishnavarman II.

P. 4, l. 16. Kalacchuri was the Haihaya family ruling in Gujarat and Malwa.

P. 4, l. 18. Revatidvipa is identified with modern Redi in the Ratnagiri district in the Bombay Presidency.

P. 5, l. 18. The Vanavasi fort on the banks of the Varada river in the North Kanara district of the Bombay Presidency was the capital of the Kadambas.

P. 6, l. 14. The greatest achievement of Pulikesin is his defeat of Harsha, the paramount sovereign of Northern India. This victory, mentioned also by Hiuen Tsiang, is made much of in the inscriptions of his successors and Pulikesin, after the defeat of Harsha, assumed the title of Parameswara.

P. 7, l. 4. Kosala or rather south Kosala might be the south-east portion of the Central Provinces between the Mahanadi and the Godavary. Kalinga is no dout the south-east portion of Orissa, of which the capital was Kalinganagara or modern Mukhalingam.

P. 7, l. 5. Pishtapuram is modern Pithapnr in the Godavary district.

P. 7, l. 14. The Pallava King of Kanchi (modern Conjeevaram) defeated by Pulikesin was Mahendravarman, son of Simhavarman.

P. 8, l. 5ff. The date of the inscription is given here. 3735 of the Era of the Great Battle and 556 of the Saka Era. It corresponds to 634—35 of the Christian Era.

P. 8, l. 12. The reading in the inscription is रविकीर्तिनेदम्.

P. 9, l. 1. The missing letter may be च.

P. 9, l. 8. *Vishamasiddhi* is a title which is explained as being due to his achieving "success (*siddhi*)

against fortresses, difficult of access (*vishama*) on the plains, in the water, in the woods and on the hills." Read *sthalajalavana* for *sthalajanavana* in the text.

P. 9, l. 13. He is also called Kubja-Vishnuvardhana. The word Kubja means 'hump-backed;' it also means 'a curved sword, a scimitar.' Puki is not identified; perhaps Pudi, seven miles south west of Chipurupalli.

P. 9, l. 14. Charupura is, perhaps, an older form of the name Chipurupalli.

P. 9, l. 19. Dimili is in the Sarvasiddhi taluq, fourteen miles towards south-east from Chipurupalli. Kalavakonda is, perhaps, Konda-kirla of the present day.

P. 9, l. 19. The year denotes the regnal year of Vishnuvardhana I. The Saka year is 555. The date of the grant is 7th July 632 A.D.

P. 10, l. 7. Gudrahara is perhaps modern Gudivada in the Kistna district. Gudivada is the name of two villages in the Vizagapatam district also. The language of this grant is rather full of inaccuracies and Mr. Fleet was not quite satisfied as to its authenticity.

P. 10, l. 8. This is the regnal year of Jayasimha I. The Saka year is 582(=660—661 A.D.)

P. 10, l. 14. His name occurs also as Indraraja

P. 11, l. 1. This is the regnal year of Vishnuvardhana. The corresponding Saka year is 586. The date of the grant is 13th March 664 A.D.

P 11, l. 3. The names of the Brahmans and their portions are specified in the grant.

P. 11, l. 8. This is again the regnal year. The Saka year is 589. The date of the grant is 17th February 668 A.D.

P. 11, l. 18. This is the regnal year of the King. The corresponding Saka year is 614.

P. 13, l. 8. The name of the Vishaya in which the village was situated is illegible. The charter was issued by Vijayaditya II. himself, but the Dutaka of the grant was Prince Nripa-Rudra who was described as a brother of Vijayaditya II. but as a descendant of the Haihaya race. He appears, therefore, to have been a half-brother, born from a different wife, of Vishnuvardhana IV. who belonged to the lineage of the Kalachuris of Tripura.

P. 13, l. 14. Ratta is the Prakrit form of Rashtra in the Sanskrit word, Rashtrakuta.

P. 14, l. 1. The prefix Kali is explained in the following line, by saying that he was "skilled in fighting with all weapons" (समस्तानामायुधानां कलौ कृती). But Fleet says it is the Dravidian word *Kali* and explains it as 'a courageous, valiant man; a hero.' We are not quite sure that this is a genuine grant. It seems to have been left unfinished. The grant purports to be of Vishnuvardhana but there is nothing in it to enable us to say whether it is to be allotted to Vishnuvardhana IV. or V.

P. 14, l. 14. This Vijayaditya is known also as Gunaka-, Gunaga-, Gunaganka- or Gunake-Nalla-Vijayaditya. The prefix is explained in one grant by saying that he was a thorough Arithmetician (*ankakaras sakshat*).

P. 14, l. 15ff. "Challenged by the lord of the Rattas, he conquered the unequalled Gangas, cut off the head of Mangi in battle and frightened the firebrand Krishna and completely burnt his city." The killing of Mangi and the burning of the city of Krishna are also spoken of in another grant and a reference to the former event is also made in the grant of Vijayaditya III. himself. The Krishna in question must be the Rashtrakuta king, Krishna II. and the city must be Malkhed.

P. 14, l. 20. The usurpation of the sovereignty by some Ratta chiefs for a period not defined, is specially to be noted. Bhima's opponent is specifically stated to be Krishnavallabha *i.e.* Krishna II. in another grant

P. 15, l. 8. A grant of Ammaraja states that he ruled over the Vengimandala together with the forests of Trikalinga or the three Kalingas.

P. 15, l. 15. Amma's name is also given as Amba. Rajamahendra is a title of Amma. The title suggests that Rajahmundry was first occupied by Eastern Chalukyas under Amma and was renamed after him.

P. 15, l. 16. Amma seems to have used his sword against some feudatory relatives who had joined the party of his natural adversaries and won over to himself the

subjects and the army of his father and his grandfather. This intimates that some of the members of his family had entered into an unsuccessful conspiracy with the Rashtrakutas to prevent his accession.

P. 16, l. 6. The family of Pattavardhani was very loyal during the days of Kubja-Vishnuvardhana.

P. 16, l. 19. Gonturu is perhaps the modern Guntur, the capital of the district of the same name.

P. 17, l. 9. Drujjuru is perhaps the present, Dzuzzuru, a village lying north of the Krishna, about 9 miles from the river and 19 miles north-west of Bezwada.

P. 17, l. 11. His name occurs also as Kollabiganda or Kollabiganda-Vijayaditya. One grant names him simply as Kollabiganda and Kollabigandabhaskara; another states that he was Vijayaditya who was also named king Kollabiganda.

P. 17, l. 13. The other forms of the name are Taha, Talapa, Tala and Talapa. One grant states that he ruled over the Vengimandala and Trikalinga.

P. 17, l. 18. Malla is also called Yuddhamalla; cf. ततस्तालपराजस्य सूनुः सूनृतवाक्प्रभुः। युद्धमल्लधराधीशः सप्तवर्षाण्यपाद्भुवम्॥

P. 19, l. 13. Lokamahadevi is the Queen of Bhima II.

P. 20, l. 1 ff. These lines give the date of the coronation of Amma II. The corresponding date of the Christian era is Friday, 5th December 945.

P. 21, l. 19. The grant reads योऽस्मदम्बया for यस्तदम्बया

P. 22, l. 11. The head of the writing department of the treasury of gold.

P. 22 ll. 16, 18. Kama and Nayamamba are the parents of the Queen of Amma II.

P. 23, l. 4. Danarnava is also styled as Dananripa.

P. 23, l. 6 f. This period has been assumed to have been a time of anarchy, with the suggestion that the anarchy may be fairly attributed to Chola invasions. The country may have been conquered and held for a time by the Cholas. The period is twice distinctly specified as 27 years. Nevertheless, as Dr. E. Hultzsch has pointed out, if the lengths of the immediately preceding and following reigns—two on either side—are stated correctly, this period must have extended to 30 years. This is determined by the actual dates of coronation recorded for Amma II and Rajaraja I. And this period can be limited to 27 years only if we assume that the coronation of Rajaraja I was deferred for three years after his actual accession, which does not appear very probable.

P. 23, l. 11. Satyaraja is another name of Saktivarman.

P. 25, l. 7 ff. These lines give the date of coronation of Rajaraja I. The corresponding date according to the Christian Era is Thursday, 16th August 1022.

P. 27, l. 20 Perhaps the present village of the same name in the Godavery district where the grant was discovered.

P. 29, l. 9. Kulottunga-Chodadeva I was first anointed, like his ancestors, to the sovereignty of Vengi in 1063; but subsequently he assumed the Chola crown and had Vengi governed for him by Viceroys. He acquired the Chola crown by hostile invasion and conquest, not at any rate entirely by a failure of the Chola succession. He annexed the Chola kingdom in the very first year of his reign. It is clear from the poem, *Vikramankadevacharita* that Kulottunga Choladeva I was enabled to seize the Chola crown through internal disturbances in the Chola kingdom which culminated in the death of the last Chola king; cf. Note from the *Vikramankadevacharita* at the end. This record names three Viceroys of Vengi appointed by Kulottunga Choladeva I.

P. 30, l. 11 ff. Herein is found recorded the date of installation of Virachola. It corresponds to Thursday, 23rd August 1078 of the Christian Era.

P. 33, l. 11. This is of course the modern village of Chellur.

P. 34, l. 2. This appears to be the modern Kalairoo, two miles south-west of Chellur.

P. 34, l. 3. This is the regnal year of Virachola. The corresponding year according to the Christian Era is 1098.

P. 38, l. 8. The date of the grant is given here. The corresponding date according to the Christian Era appears to be 23rd March 1132.

Chalukyas, it is doubtless to his time that we must refer the defeat of the people of Kalyana, and the defeat of the Kuntalas at Kudal-sangam—*i. e.* in both cases, of the Western Chalukyas. The most interesting, however, of the events between Vikramaditya VI and the Cholas occurred, according to the poem, after the death of Someswara I and the accession of Someswara II. Vikramaditya VI was then contemplating another campaign against the Cholas. The Chola king, feeling himself unable to resist, sent an ambassador asking for friendship and offering his daughter's hand in marriage to the Chalukya king. By an amicable arrangement, Vikramaditya VI retired to the Tungabhadra; and there the marriage was celebrated. Hardly was this done, when the Chola king died and the kingdom fell into a state of anarchy. Vikramaditya VI proceeded at once to Kanchi and subdued the rebels there; next he visited Gangakunda again and secured the Chola succession for his wife's brother; and then after a further stay of a month at Kanchi, he returned to the Tungabhadra. Within a few days, however, after his return, the news reached him that his brother-in-law had lost his life in a fresh rebellion and Rajiga, the lord of Vengi, had taken possession of the throne of Kanchi. Vikramaditya VI marched at once against Rajiga. The latter induced Vikramaditya's brother to combine with him and a battle was fought. But the victory rested with Vikramaditya VI and Rajiga fled and the former's brother was taken prisoner. This los Vikramaditya's brother the throne; and shortly afterwards,

according to the poem, Vikramaditya VI allowed himself to be proclaimed ruler of the Dekkhan.

Subsequently to this, the Cholas are mentioned again in a passage which says that after a variety of wars against unnamed enemies, Vikramaditya once more had to extinguish the Chola. Whether this refers to the Eastern Chalukyas, as holders of the Chola crown, or to an attempt on the part of the real Cholas to reassert themselves, is not apparent. This event is placed just before the entrance of Vikramaditya VI into his capital of Kalyana.

Subsequently to this, the Cholas were attacked only once more; after a long time of peace, they again became proud and insolent; Vikramaditya's army marched on Kanchi and took the city; and Vikramaditya amused himself there for some time, before returning to his capital. Here the expression "the Cholas" seems to denote really "the Eastern Chalukyas."